7234

1. Title Vedavyāsa Kratiriyaṁ
2. Accession No. 5569
3. Folio No./Pages 106
4. Lines 13-14
5. Size 29 × 14 Cm.
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not mentioned.
10. Beginning "ओम् गणेशाय नमः कलावतो दोषाद्यो त्रिषयासक्त मानस..."
11. End "व्यासेन कीर्तितम ।।पठेद्य इद्दत्पुरुषः श्रय प्राप्तु सुखानिच ।। 141 ।। विश्वे ।।"
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Mahabhārata Kathā
16. Revisor No
17. Author Not Known
18. Remarks Bound. Papers are without number.

2

3

वेद व्यास क्रितिषं

ॐ श्रीगणेशाय नमः॥ कलावतोरोषाद्यो विषयासक्तमानसः॥ कृत्वानु सकलं पापं गोविंदं संस्मरेच्छुचिः॥१॥ श्रुति
पापप्रसक्तोपि ध्यायन्निमिषमच्युतं॥ भूयस्तपस्वी भवति पंक्तिपावनपावनः॥२॥ किपानपि नमस्कारः प्रयुक्त
श्चक्रपाणये॥ संसारस्थूलबंधानामुद्वेजनकरो हि सः॥३॥ सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे॥ नमो
वेदांतवेद्याय गुरवे बुद्धिसाक्षिणे॥४॥ कृष्णद्वैपायनं व्यासं सर्वलोकहितेरतं॥ वेदाब्जभास्करं वंदे शमादिनिलयं मुनिं॥
पास्मह्यमूर्तेः पुरुषोत्तमस्य सहस्रनेत्रानन पादबाहोः॥ सहस्रनामस्तुवने प्रशस्तं निरुच्यते जन्मजरादि शांत्यै॥६॥
श्रीवैशंपायन उवाच॥ वैशंपायनो जन्मेजयं प्रत्युवाच। श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः॥ युधिष्ठिरः शांतनवं
पुनरेवाभ्यभाषत॥१॥ टीका॥ श्रुत्वा धर्मानशेषेणत्यादि धर्मानभ्युदयनिःश्रेयसोत्पत्तिहेतुभूतान् वेदलक्षणान्वेदोक्तान्
शेषेण कार्त्स्न्येन पावनानि पापक्षयकरणानि॥ सर्वशः सर्वप्रकारैः श्रुत्वा॥ युधिष्ठिरो धर्मपुत्रः शांतनवं शंतनुसुतं भीष्मं
सर्वपुरुषार्थसाधनं अल्पप्रयाससमनल्पफलं सुखसंपाद्यं मनुष्यमिति कृत्वा पुनर्भूय एवाभ्यभाषत प्रोक्तवान्॥ युधिष्ठिर उवाच॥
किमेकं दैवतं लोके किंवाप्येकं परायणं॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं॥२॥ टीका॥ किमेकं दैवतं लोके देवस्त्व
र्थः स्वार्थे तल्प्रत्ययतद्धितविधानात॥ लोके लोकनहेतुभूते समस्तविद्यास्थाने उक्तमिति प्रथमः प्रश्नः॥ किंवा
प्येकं परायणं परमयनं प्राप्तव्यं परायणं अस्मिन्नेव लोके परं परायणं च किमुक्तं॥ यदाशाका प्रवर्तंते सर्वे यस्मिन्नि
वर्तंते॥ भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥ यस्य विज्ञानमात्रेण नृ
दलक्षणो मोक्षः प्राप्यते॥ यदि हा विभिन्नति कुतस्त्रान [illegible] स्य न विद्यते पुनर्भवः॥ यस्य वेदनात् देवो भवति यदि
तायापरः पंथा नृणां नास्ति॥ तदुक्तमेकं परायणं च लोके त्विमिति द्वितीयः प्रश्नः॥ कं कतमं देवं स्तुवंतः गुणसं
कीर्तनं कुर्वंतः तृतीयः प्रश्नः॥ कं कतमं देवमर्चंतो बाह्यमाभ्यंतरं चार्चनं बहुविधं कुर्वंतः मानवाः मनुजाः शुभं कल्याणं
स्वर्गापवर्गादि फलं प्राप्नुयुर्लभेयुरिति चतुर्थः प्रश्नः पुनः प्रश्नद्वयं॥२॥ युधिष्ठिर उवाच॥ को धर्मः सर्वधर्माणां भ
वतः परमो मतः॥ किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात्॥३॥ टीका॥ को धर्मः पूर्वोक्तलक्षणः सर्वेषां धर्माणां म
ध्ये भवतः परमः प्रकृष्टो मतोभिप्रेतः ॥ इति पंचमः प्रश्नः॥ किं जपं जपन् उच्चैस्तूपांशु मानसलक्षणं जपं कुर्वन्
जंतुः जननमधर्मा॥ अनेन जंतुः शब्देन जपाद्येतत्स्तुवतादिषु यथायोग्यं सर्वप्राणिनामधिकारं सूचयति जन्मसंसा
रबंधनात्॥ जन्मेत्युज्ञानविजृंभितानामविद्याकार्याणामुपलक्षणं संसारोविद्या ताभ्यां जन्मसंसाराभ्यां यद्बंधनं
तस्मान्मुच्यते मुक्तो भवतीति षष्ठः प्रश्नः॥ जन्मसंसारबंधनादितीदमुपलक्षणं इतरेषां फलानामपि तद्ग्रहणं मोक्षस्य
प्राधान्यज्ञापनार्थं॥ श्रीभीष्म उवाच॥ उत्तरं॥ सर्वेषां प्रश्नानां भयहेतुत्वाद्भीष्मः॥ मोक्षधर्मादीनां प्रवक्तास वक्ता॥ श्लोकः
जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमं॥ स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः॥४॥ टीका॥ षट्प्रश्नाः कृताः तत्र पश्चा
त्तानंतरोज एव विशेषस्थितप्रश्नो नेन श्लोकेन परिह्रियते॥ जगत्प्रभुमिति॥ जगत्स्थावरजंगमात्मकं तस्य प्रभुं स्वा
मिनं देवानां देवं देवदेवं अनंतं देशतः कालतो वस्तुतश्चमानरहितमपरिछिन्नं पुरुषोत्तमं क्षराक्षराभ्यां कार्यकारणा
भ्यां उत्कृष्टं॥ नाम्नां सहस्रेण नाम्नां सहस्रेण स्तुवन् ग्रहणेन तद्गुणसंकीर्तयन्॥ सततोत्थितः निरंतरमुद्युक्तः पु
रुषः पूर्णत्वात् पुरिशयनाद्वा पुरुषः सर्वदुःखातिगो भवेदिति सर्वत्र संबध्यते॥ उत्तरेण श्लोकेन चतुर्थः प्रश्नः स
माधीयते॥६॥ श्लोकः॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं॥ ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च॥ टीका॥
॥५॥

१ तात्पर्येण

तमेवचार्चयन्‌ वाह्यस्वभ्यंतरमर्चनं कुर्वन्‌ नित्यं सर्वेषु कालेषु भक्त्या भक्तिर्भजनं तत्परता॥ तयाभक्त्या पुरुषमव्ययं 6
विनाशविक्रियारहितं॥ ध्यायन्नभ्यंतरमर्चनं कुर्वन्स्तुवन्पूर्वोक्तं गुणसंकीर्तनं कुर्वन्‌ नमस्यन्नमस्कारं कुर्वन्पू
जाशेषभूतमुभयं स्तुतिनमस्कारलक्षणं॥ यजमानः पूजकः फलभोक्ता॥ अथवा अर्चयन्नित्यं येन उभय ग्र
विधमर्चनं मुच्यते॥ ध्यायन्स्तुवन्नमस्यन्निति मनसं वाचकं कायिकं चोच्यते तृतीयं प्रश्नं परिहरन्नुत्तरैः
पदैस्त्रिभिः॥५॥ श्लोकः॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्वरं॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥
टीका॥ अनादीति॥ अनादिनिधनं षड्भावविकाररहितं जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्य
तीति षड्भावविकाररहितं विष्णुं व्यापनशीलं सर्वे लोक्यन्त इति लोकाः दृश्यवर्गः तस्य नियंतृणां ब्रह्मादीना
मीश्वराणामपीश्वरत्वात्सर्वलोकमहेश्वरस्तं लोकाध्यक्षं लोकं दृश्यवर्गं साक्षिभावेनावेक्षते साक्षात्पश्यती
ति लोकाध्यक्षस्तं। नित्यं निरंतरं स्तुवन्सर्वदुःखातिगो भवेदिति॥ त्रयाणां सापरलौकफलवचनं सर्वाण्यध्यात्म
कादीनि दुःखान्यतीत्य गच्छतीति सर्वदुःखातिगो भवेत्‌। पुनरपि तमेव स्तुत्यं विशिनष्टि विशादं करोति।
६ श्लोकः॥ ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्द्धनं॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवं॥७॥ टीका॥ ब्रह्मण्यं ब्र
ह्मणे ब्राह्मणाय तपसे श्रुतये च हितं॥ सर्वान्धर्मान्‌ जानातीति सर्वधर्मज्ञस्तं॥ लोकानां प्राणिनां की
र्तिं यशांसि तानि स्वशक्त्यानुप्रवेशेन वर्द्धयन्तं॥ लोकैर्नाथ्यते याच्यते लोकाननुपनाति आशास्ते लोकाना

मीश इति वा लोकनाथस्तं॥ महद्भूतं महद्भूतं विश्वोत्कर्षेण वर्तमानत्वात्‌ महद्भूतं परमार्थसत्यं सर्वभूतानां भवः संसारः
यस्मात्सकाशादुद्भवतीति सर्वभूतभवोद्भवस्तं॥ एष इति पंचमः प्रश्नः परिह्रियते सर्वेषां धर्माणां वेदलक्षणानामेष 7
वक्ष्यमाणो धर्मोऽधिकतमः इति मे मतः अभिप्रेतः यद्भक्त्या तात्पर्येण पुंडरीकाक्षं हृदयपुंडरीके प्रकाशमानं
वासुदेवं स्तवैः गुणसंकीर्तनलक्षणैः स्तुतिभिः सदार्चेत्‌ सत्कारपूर्वकमर्चनं करोति नरो मनुष्य इति यदेष धर्म
इति संबंधः अस्य स्तुतिलक्षणस्यार्चनस्याधिक्ये किं कारणमुच्यते॥ हिंसादिपुरुषांतरद्रव्यांतरदेशकालादिनिय
न मादनपेक्षत्वमाधिक्यकारणं॥ ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्‌ यदाप्नोति तदाप्नोति कलौ संकीर्त्य
केशवमिति श्रीविष्णुपुराणवचनात्‌। जप्येनैव तु संसिद्ध्येद्‌ ... नात्र संशयः॥ कुर्यादन्यन्नवा कुर्यान्मैत्रो ब्राह्मण
उच्यते॥ इति मानववचनात्‌॥ जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते॥ अहिंसया हि भूतानां जपयज्ञः प्रवर्तते॥ इति म
हाभारते यज्ञानां जपयज्ञोऽस्मीति भगवद्वचनादेतत्सर्वमभिप्रेत्यं॥७॥ श्लोकः॥ एष मे सर्वधर्माणां धर्मोऽधिकत
मो मतः॥ यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा॥ टीका॥ एष मे सर्वधर्माणामित्युक्तं॥ परमिति॥ द्वितीयं प्रश्नं समा
धत्ते॥८॥ श्लोकः॥ परमं यो महत्तेजः परमं यो महत्तपः॥ परमं यो महद्ब्रह्म परमं यः परायणं॥९॥ टीका॥ परमं यो
महत्तेजः प्रकृष्टं महद्‌ तेजश्चैतन्यलक्षणं सर्वावभासकं॥ येन सूर्यस्तपति तेजसेद्धस्तदेव ज्योतिषां ज्योतिर्न तत्र
सूर्यो भाति न चंद्रतारकं इत्यादिश्रुतेः यदादित्यगतं तेजो जगद्भासयतेऽखिलं॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो
विद्धि मामकमित्यादिस्मृतेश्च॥ परमं तपः तपत्याज्ञापयतीति तपः। परमं च लोकं परं च लोकं सर्वाणि भू
तानि च योंऽतरो यमयतीत्यंतर्यामी ब्राह्मणे सर्वनियंतृत्वं श्रूयते॥ भीषास्माद्वातः पवते इत्याद्यैस्तैत्तिरीयकेत
दि

पती एगति वा तपः तप ऐश्वर्ये इत्यस्य धातोः । यं ज्ञस्यैश्वर्यमनवच्छिन्नमिति महत्त्वं एष सर्वेश्वर इत्यादि श्रुतेः 8
परमं सत्यादिलक्षणं । बृहन्महतीयततया महत्त्वपरमं प्रकृष्टं परायणं पुनरावृत्तिशंकावर्जितं परमग्रहणात्
सर्वत्र परमंस्य तेजःप्रादित्यादिकं व्यावर्त्यते सर्वत्र यो देव इति शेष्यते यो देवः परमं तेजः परमं तपः परमं
ब्रह्म परमं परायणं ॥ सराकः सर्वभूतानां परमं परायणमिति वाक्यार्थः ॥ प्रथमप्रश्नस्योत्तरमाह ॥ प
वित्राणामिति ।८। श्लोकः । पवित्राणां पवित्रं यो मंगलानां च मंगलं ॥ दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥१०॥
टीका । पवित्राणां पवित्रं किं । पवित्राणां पावनानां तीर्थादीनां यः पवित्रं परमस्तु पुमान् ध्यातो एषः कीर्तितः
स्मृतास्तुतः संपूजितः सर्वान्पापान् उन्मूलयतीति परमं पवित्रं संसारबंधहेतुभूतं पुण्यापुण्यात्मकं कर्म
तत्कारणं चाज्ञानं सर्वं नाशयति ॥ स्वयाथात्म्यज्ञानेनेति वा पवित्राणां पवित्रं ॥ यन्नामकीर्तनं भक्त्या वि
लापनमनुत्तमं ॥ मैत्रेयाशेषपापानां धातूनामिव पावकः ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥
न पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥ ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति
कलौ संकीर्त्य केशवं ॥ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥
ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् ॥ तत्सर्वं विलयं याति तोयस्थं लवणं यथा ॥ प्रायश्चित्तान्यशे
शेषाणि तपःकर्मात्मकानि वै ॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परं ॥ ध्यायेन्नारायणं देवं स्नाना
दिषु च कर्मसु ॥ प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः ॥ संसाररावसंहरएकचेऐषु भेषजं ॥

कस्मेति वै स्मृतं मंत्रं श्रुत्वा मुक्तो भवेन्नरः । यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिंतने विघ्नो यत्र निवेशि
तात्म मनसो ब्राह्मोऽपि लोकोल्पकः ॥ मुक्तिं चेतसि यः स्थितो मलधियां पुंसां ददात्यव्ययः ॥ किं चित्रं यद 9
घं प्रयाति विलयं तत्राच्युते कीर्तिते ॥ ईश्वरो देवीं प्रत्याह मुक्तिकारणं यावज्जीवं प्रणवमपवावर्तयेदि +
द्रियं वा यावज्जीवं वसति मपवादे विकाश्यां विदध्यात् । हित्वा यज्ञान्कलिमलकुलच्छेदकानीरवेदा
विद्योनीमान्यविशमभ्रमतश्रान्तिरेषा चतुर्णां ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं ॥ येषां हृदिस्थो
तो देवो मंगलायतनो हरिः ॥ नित्यं संचिंतयत्येष योगयुक्तो जनार्दनं ॥ सास्य रक्षापरामन्ये को हि नु तस्य
च्युतं श्रयं ॥ रूपमारोग्यमर्थाश्च भोगांश्चैवानुषंगिकान् ॥ ददाति ध्यायतां नित्यं मपवर्गप्रदो हरिः
चिंत्यमानः समस्तानां क्लेशानां हानिहि सः ॥ समुत्सृज्याखिलं चिंत्यं सोऽच्युतः किं न चिंत्यते ॥ गंगास्ना
नसहस्रेषु पुष्करस्नानकोटिषु ॥ यत्पापं विलयं याति स्मृते नश्यति तद्धरौ मुहूर्तमपि यो ध्यायेन्नारा ६
यणमतंद्रितः ॥ सोऽपि सिद्धिमवाप्नोति किं पुनस्तत्परायणः ॥ एकस्मिन्नप्यतिक्रांते मुहूर्ते ध्यानवर्जिते ।
दस्युभिर्मुषितेनैव युक्तमाक्रंदितुं भृशं ॥ जनार्दनं भूतपतिं जगद्गुरुं स्मरेन्मनुष्यः सततं महामुने दुः
खानि सर्वाण्यपहंति साधयत्यशेषकार्याणि च यान्यभीप्सितं ॥ एवमेकाग्रचित्तः सन्संश्रितो
मधुसूदनं ॥ जन्ममृत्युजराग्राहं संसाराब्धिं तरिष्यति ॥ यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।

तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषं ॥ वासदेवे मनो यस्य जपहोमार्च्चनादिषु ॥ तस्यांतरायो मैत्रेय देवें
द्रत्वादिकं फलं ॥ लोकत्रयाधिपतिमप्रतिमप्रभावमेवं प्रणम्य शिरसा प्रभुविष्णुमीशं जन्मांतरप्रल
यकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापं ॥१॥ अतसीपुष्पसंकाशं पीतवाससमच्यु
तं । ये नमस्यंति गोविंदं न तेषां विद्यते भयं । अपि पातककृत्कोपि ध्यायन्निमिषमच्युतं ॥ भूयस्तप 110
स्वी भवति पंक्तिपावनपावनः ॥ आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥ इदमेकं सुनिष्पन्नं
ध्येयो नारायणः सदा ॥ हरिरेकः सदा ध्येयो भवद्भिः सत्वसंस्थितैः ॥ ओमित्येवं सदा विप्राः पठत ध्यात
केशवं इत्यादिवचनात् ॥ भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे प
रावरे ॥ इत्यादि श्रुतिभ्यश्च ॥ मंगलानां च मंगलं ॥ सुखं तत्साधकं वेति तत्ज्ञापकं वा तेषामपि पर
मानंदलक्षणं परमं मंगलमिति दैवतं देवतानां चेति देवः ॥ द्योतनादिभिः सर्वात्मकः एव वर्तमानत्वात्
भूतानां प्राणिनां योऽव्ययः व्ययरहितः पिता जनको यो देवः स एकं दैवतं लोक इति वाक्यार्थः ॥ एको दे
वः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो नि
र्गुणश्च ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं हि देवमात्मबुद्धिप्रकाशं मुमु
क्षुर्वै शरणमहं प्रपद्ये इति श्वेताश्वतराणां मंत्रोपनिषदि ॥ सेयं देवतैक्षत ॥ सदेव सोम्येदमग्र आ
सीदेकमेवाद्वितीयमिति छांदोग्ये च ॥ ननु कथमेको देवो जीवपरमेश्वरयोर्भेदात् ॥ तत्सृष्ट्वा तदेवा
नुप्राविशत् ॥ स एष इह प्रविष्टः ॥ आनखाग्रेभ्यः इत्यादि श्रुतिभ्यः अविकृतस्य परस्य परबुद्धितद्बुद्धि 11
स्यास्तित्वेन प्रवेशश्रवणाद्भेदः ॥ प्रविष्टानामितरेतरभेदात्परात्मना नैक्यमिति चेन्न एको देवो ब
हुधा सन्निविष्टः ॥ एकः सन् बहुधा विचचार ॥ त्वमेकोऽसि बहून् अनुप्रविष्टः इत्येकस्यैव बहुधा
प्रवेशश्रवणात् प्रविष्टानां परस्य च न भेदः ॥ हिरण्यगर्भः समवर्तताग्रे इत्याद्या मंत्राः ॥ कस्मै देवा हे
ता यस्तं एक देव इति अर्थ प्रतिपादकः ॥ तैत्तिरीयके ॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभू
वः ॥ एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चा
क्षुषैर्बाह्यदोषैः ॥ एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ वायुर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ॥ एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥ एको वशी सर्वभूतांतरा
त्मा एकं रूपं बहुधा यः करोति ॥ तमात्मस्थं येऽनुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां ॥ नित्यो
नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ॥ तमात्मस्थं येऽनुपश्यंति धीरास्ते
षां शांतिः शाश्वती नेतरेषामिति ॥ कठवल्लीषु ॥ ब्रह्म वा इदमग्र आसीत् एकमेव तदेकं सदप्यमय
त् ॥ नान्योतोऽस्ति द्रष्टा नान्योतोऽस्ति श्रोता नान्योतोऽस्ति मंता नान्योतोऽस्ति ज्ञातेति बृहदारण्यके ॥

12

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्॥ तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ इती-
शावास्ये॥ आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन सर्वेषां भूतानामन्तरः पुरुषः स म आत्मेति
विद्यात्॥ नान्यत्किंचन मिषतः एकं सद्विप्रेति विप्रा बहुधा वदन्ति॥ एकं सन्तं बहुधा कल्पयन्ति
द्यावाभूमी जनयन्देव एकः॥ एको विंश मन्त्रित्रिरिति तैत्तिरेयके॥ एकोदधार भुवनानि विश्वा इति रु-
द्रवेदे॥ तदेव सोम्येदमग्र आसीत्॥ एकमेवाद्वितीयं ब्रह्मेति छांदोग्ये॥ सर्वभूतस्थितं यो मां भजत्ये-
कत्वमास्थितः॥ सर्वथा वर्तमानोऽपि स योगी मयि वर्तते॥ विद्याविनयसंपन्ने इत्यादि॥ अहमात्मा गुडा-
केश सर्वभूताशयस्थितः॥ अहमादिश्च मध्यं च भूतानामन्त एव च॥ यदा भूतपृथग्भावमेकस्थमनुप-
श्यति॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः॥ क्षेत्रं क्षे-
त्री तथा कृत्स्नं प्रकाशयति भारत॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज॥ अहं त्वा सर्वपापेभ्यो मो-
क्षयिष्यामि मा शुचः॥ इत्यादि गीतोपनिषत्सु॥ हरिरेकः सदा ध्येयो भवद्भिः सत्वसंस्थितैः॥ ओमि-
त्येवं सदा विप्राः पठन्ते यान्ति केशवं॥ आचार्यैः खलु देवानामेकः सर्वं पुरुषोत्तम॥ धन्यश्चास्मि
महाबाहो लोके नान्योस्ति कश्चन॥ इति हरिवंशे॥ भवति च मतो भेदास्तत्र व्यापनी श्रुतिः॥ यदै

13

किंचिन्मनुरवदत्तद्भेषजमिति॥ मनुनाचोक्तं॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मयाजी
वैः स्वाराज्यमधिगच्छति॥ सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकां स संज्ञां याति भगवानेक एव
जनार्दनः॥ तस्मान्न विज्ञानमृतेऽस्ति किंचित् क्वचित्कदाचिद्द्विज वस्तुजातं॥ विज्ञानमेकं निजकर्म-
भेदैर्विभिन्नचित्तैर्बहुधाभ्युपेतं॥ ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसंगं॥ एकं सदै-
निः कं परमं परेशं स वासुदेवो न यतोऽन्यदस्ति॥ तथा॥ यदा समस्तदेहेषु पुमानेको व्यवस्थितः॥ तदा हि को
भवान्कोहमिति तेनैतद्विफलं वचः॥ सितनीलादिभेदेन यथैकं दृश्यते नभः॥ भ्रांतिदृष्टिभिरात्मापि तथै-
कः स पृथक्पृथक्॥ एवः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्यत्॥ सोऽहं स च त्वं स च स-
र्वमेतदात्मस्वरूपं त्यज भेदमोहं॥ इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः॥ सकलमिदम-
हं च वासुदेवः परमपुमान्परमेश्वरः स एकः॥ इति मतिरचला भवत्यनंते हृदयगते व्रजतान्विहाय
दूरात्॥ यथाहं वसुधाम सर्वं सततमेतद्दिवौकसः॥ अहं भवान्भवांश्चैव सर्वे नारायणात्मकं॥ विभूतय-
स्तु यास्तस्य तासामेव परस्परं॥ आधिक्यं न्यूनता बाध्यबाधकत्वेन वर्तते॥ भवान्नहं च विश्वात्मन्नेक ए-
व हि कारणं॥ जगतोऽस्य जगत्यर्थे भेदभाजा व्यवस्थितौ॥ त्वया यदभयं दत्तं तद्दत्तमभयं मया॥ म-
त्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शंकर॥ योऽहं स त्वं जगच्चेदं सदेवासुरमानुषं॥ अविद्यामोहितात्मानः
पुरुषा भिन्नदर्शिनः॥ इति श्रीविष्णुपुराणे॥ विष्णोः स्वयमनुपश्यंति ये मां ब्रह्माणमेव च॥ कुतर्कमत

योमूढः पच्यंते नरकेष्वधः ॥ येन्ये मूढा दुरात्मानो भिन्नं पश्यंति मां हरेः ॥ ब्रह्माणं च तथा तिष्ठं भूतगणं तथास 14
मेत्त्वहं ॥ इति भविष्यत्पुराणे ॥ महेश्वर वचनं ॥ तथा च हरिवंशे ॥ कैलास यात्रायां महेश्वर वचनं ॥ त्वमादि
त्वं रत्नादि श्लोकः पठं स्रष्टुं ॥ आदिस्त्वं सर्वभूतानां मध्यमंतस्तथा भवान् ॥ त्वत्तः सर्वमभूद्विश्वं
त्वयि सर्वं प्रलीयते ॥ अहं त्वं सर्वगो देव त्वमेवाहं जनार्दन ॥ आवयोरंतरं नास्ति शब्दैरर्थैर्जगत्पते ॥ ना
मानि तव गोविंद यानि लोके महांति च ॥ तान्येव मम नामानि नात्र कार्यविचारणा ॥ त्वदुपासा जगन्ना
थ सैवास्तु मम गोपते ॥ यश्च त्वां द्विषते देव स मां द्वेष्टि न संशयः ॥ तद्विस्तारो यतो देव अहं भूतपतिस्त
तः ॥ न तदस्ति विभो देव यत्ते विरहितं क्वचित् ॥ यदासीद्वर्तते यच्च यच्च भावि जगत्पते ॥ सर्वं त्वं देव देवे
श विना किंचिन्न यान हि ॥ आत्मैव तत्पंग हंति गाहयंति पुराणविद् ॥ आत्मैव त्वेवं शास्त्रोक्तलक्षणं परमार्थमनि
प्रतिपत्तव्यं ॥ तथा हि परमात्मप्रक्रियायां ॥ एवावानस्यात्मत्वेनैतमभ्युपजगाति ॥ त्वं वाहमस्मि भगवन्देवो
देवतेति ॥ अहं वै त्वमसि देवतेति ॥ तथान्यत्र ॥ यदेवेह तदमुत्र यदमुत्र तदन्विह ॥ स यश्चायं पुरुषे यश्चा
सावादित्ये स एकः ॥ तदात्मानमेव वेद ॥ अहं ब्रह्मास्मीति ॥ तदेतद्दृष्ट्वा पूर्वमपरमनंतरमबाह्यमय
मात्मा ब्रह्म स एव महानज आत्माऽजरोऽमरोऽमृतोऽनिर्वोत्तरो बायो ब्रह्म यो ब्रह्मेत्येव माद यः आ
[illegible] ॥ [illegible] देवमरं वेद वा कानि ॥ एष त आत्मा सर्वांतरः एष त आत्मांत

र्याम्यमृतं यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते नसत्वं ॥ स आत्मा
तत्त्वमसीत्येवमादीनि ॥ ननु प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति ॥ तदयुक्तं ॥ गौण 15
त्वप्रसंगात् ॥ वाक्यवैरूप्याच्च ॥ यत्र हि प्रतीकदृष्टिरभिधीयते सकृदेव तत्र वचनं भवति ॥ यथा मनो
ब्रह्मेत्यादित्यो ब्रह्मेति ॥ इह पुनस्त्वमहमस्म्यहं च त्वमसीत्याह ॥ अतः प्रतीकश्रुतिवैरूप्यादभेद
प्रतिपत्तिः ॥ भेददृष्ट्यपवादाच्च ॥ तथा हि ॥ अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति
न स वेद ॥ यथा पशुरेवं सः ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ यथोदकं दुर्गे वृष्टं पर्व
तेषु विधावति एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति ॥ द्वितीयाद्वै भयं भवति ॥ यदा ह्येवै
ष एतस्मिन्नुदरमन्तरं कुरुते ॥ अथ तस्य भयं भवति ॥ तत्त्वेव भयं विदुषो मन्वानस्य ॥ सर्वं तं परादात्
योऽन्यत्रात्मनः सर्वं वेदेति इत्याद्या भूयसी श्रुतिर्भेददर्शनमपवदति ॥ आत्मैवेदं सर्वं आ
त्मनि विज्ञाते सर्वमिदं विज्ञातं भवति ॥ इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमिति च ॥ तथा च
स्मृतिरपि यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि
तेत्रजेश्वरे कात्वं सर्वोपनिषदि प्रसिद्धं इत्यमीत्यर्थः ॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥

अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकमिति ॥ अद्वैतात्मतानं समग्दर्शनमिति ॥ उक्तं भगवद्गीताया 16
मपि ॥ तत्रस्मादात्मन्येवेश्वरे मनो दधीत ॥ सिद्धेप्यपि देवस्य प्रामाण्ये दृष्टव्यं ॥ स्वपरसाधनादिनि
रकार्यमपीमाह चेति ॥ तत्र परोपि देवदेव इति श्रुतेः ॥ परमार्थदर्शनं परमात्मस्वरूपफलं वत इत्य
नियुक्तैरुक्तं ॥ अन्यान्वितस्वार्थे पदानां सामर्थ्ये स्वीयानुकार्यानिते स्वार्थे ॥ तथा सति अर्थवा
दानामनन्वयप्रसंगात् ॥ अनन्वयबुद्धेः स्तुतित्वात् ॥ न हि भवति वायुर्वा आलभेतेति तिलेपिधिन्नमते
ति ॥ रागस्यैव प्रवर्तकत्वं नास्ति योगस्य च ॥ तथा च श्रुतिः ॥ अथ खल्वाहुः काममय एवायं
पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति ॥ यत्क्रतुर्भवति तत्कर्म कुरुते तदभिसंप
द्यते ॥ तथा स्मृतिरपि ॥ अकामतः क्रिया काचिद्दृश्यते नेह कस्यचित् ॥ यद्यद्धि कुरुते किंचि
त्तत्तत्कामस्य चेष्टितं ॥ काम एष क्रोध एष रजोगुण इति ॥ अन्यपुराणमपि मैत्रायणीवादानीय माणय
कथनेनोरगत्वं गतवान्नहुषः ॥ कर्पं स्वयमस्तु परिभ्रान्ता वाच्य मामा दुरात्मना देवर्षयो महाभा
गास्तथा ब्रह्मर्षयो मलाः ॥ ॥ प्रपृच्छुः संशयं तेन तु — तं पापचेतसं ॥ यस्मैव ब्राह्मणाः प्रोक्ता मंत्रा वेदप्रो
क्ताणि गवां ॥२॥ एते प्रमाणं भवति उताहो नेति वासव ॥ नहुषो नेति तानाह तमसा मूढचेतनः ॥२॥
ऋषय ऊचुः ॥ अधर्मे संप्रवृत्तस्त्वं धर्मं च विचिकित्ससि ते प्रमाणं वेदवाक्यं पूर्वं प्रोक्तं महर्षिभिः ॥

४८ अगस्त्य उवाच ॥ ततो विवदमानस्तु ऋषिभिः सह पार्थिवः ॥ अथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडितः । 17
।पातेनाभूद्धीनतेजाश्च निःश्रीकश्च शचीपतिः ॥ ततस्तमहमाविग्नमवोचं भयपीडितं ॥६॥ यस्मा
त्पूर्वैः कृतं मार्गं महर्षिभिरनुष्ठितं ॥ अदूषयस्त्वं ब्रह्मर्षीन् यच्च मूर्ध्न्यस्पृशः पदा ॥७॥ यस्मात्त्वमपि महीपान्मू
ढवृत्तकल्पान्दुरामदम् ॥ वाहनं कृत्वा वहसि तेन स्वर्गाच्च्युतो भव ॥८॥ त्वं स्वपापपरिभ्रष्टः क्षीण
पुण्यो महीतले ॥ दशवर्षसहस्राणि सर्परूपधरो महीं ॥९॥ विचरिष्यसि क्षीणे पुनः स्वर्गमवा
प्स्यसीति ॥ ह ष्टा युधिष्ठिरं नाम तवं शममुद्धवास्मिति महाभारते ॥ अतः श्रद्धेयमात्मज्ञानं ॥ अप्र
दधानाः पुरुषा धर्मस्यास्य परंतप ॥ अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि इति श्रीभगवद्गीतायाम
प्युक्तं ॥ तैत्तरीयके च ॥ एवं पापानं तत्कर्मैतद्दृष्ट्वे तत्सत्यं तस्मात्प्रमादेन तराम याज्ञाद्यन्यास्यपूर्वैर्येत्वो
पास्ते य शाय भूयः ॥ तद्यत्कर्मेवमृत्विजः प्रजा हति सोऽमुत्रायसीपुरेति ताहवेनाशमाः प्रजास्ति सो पापमाया
रताती मानिवर्यां सिन गावगंधाश्च रपा दा इति श्रुतेः ॥ वंगावनगार जाः ॥ अवगंधक्षौपधयः र
पदाः ॥२॥ सर्पादयः तपार्शवासे श्रुति इन्द्रिंद्रा धर्मीयमंत्र ॥ अमृतयीनामतेलोकात्र्यंपेनतमसावृ
ताः ॥ तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः इति तैत्तरीयके च ॥ सत्येव संभवतिस्त्र मद्भुत्येति
वेद चेदिति तथा शङ्कितलोपाख्याने ॥ योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ॥ किं तेन न कृ

तं पापं चौरेण त्वपहारि रोति॥ सहस्रनामजपस्य तत्स्नानमुच्यते॥ यस्मिन्देवाश्च वेदाश्च पवि
त्रं कृत्स्नमेकतां व्रजेत् तन्मानसं तीर्थं यस्मिन् स्नात्वा मृतो भवेत्॥२॥ ज्ञानह्रदे ध्यानजले रागद्वेषम
लापहे॥ यः स्नाति मानसे तीर्थे स याति परमां गतिं॥३॥ आत्मा नदी संयमतोयपूर्णा सत्य
ह्रदा शीलतटा दयोर्मी॥ तत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चांतरात्मा॥४॥ इति महा
भारते॥ मानसं स्नानं विष्णुचिंतनमिति॥ विष्णुस्मृतौ॥ जपेनैव तु संसिद्ध्येद्ब्राह्मणो नात्र संशयः॥
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥ इति मानवं वचनं॥ जपस्तु सर्वधर्मेभ्यः परमो धर्म उ
ते॥ अहिंसया च भूतानां जपयज्ञः प्रवर्तते॥२॥ यज्ञानां जपयज्ञोऽस्मीति भगवद्वचनात्॥ अपवि
त्रः पवित्रो वा सर्वावस्थां गतोऽपि वा॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः॥३॥ इति यदेकं दैवतं
प्रस्तुतं तदुपलक्षणमुच्यते॥१०॥ श्लोकः॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे॥ यस्मिंश्च प्र
लयं याति पुनरेव युगक्षये॥१०॥ टीका॥ यतो यस्मात्सर्वाणि भूतानि भवंति उद्भवंति आदियुगागमे॥
युगानामादिः युगादिः कल्पस्य प्रथमारंभदिवसस्तस्यागमे आदियुगागमे यस्मिंश्च प्रलयं
विनाशं याति पुनः भूय एवेत्यवधारणार्थ तस्मिन्नित्यर्थः॥ युगक्षये महाप्रलये चकारात्

धेऽपि यस्मिन् क्षयं यंति॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्या
दिश्रुतेः॥११॥ श्लोकः॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते॥ विष्णोर्नामसहस्रं मे शृणु पापभ
यापहं॥११॥ टीका॥ तस्यैवं लक्षितस्यैकदैवतस्य लोकप्रधानस्य लोकनेतृभिः पूजितपादस्य जग
न्नाथस्य भूपते हे महीपाल विष्णोर्व्यापनशीलस्य नाम्नां सहस्रं पापं च भयं चापहंतीति पापभ
यापहं मे मत्तः शृणु॥ एकाग्रमना भूत्वा अवधारय॥ एकस्यैव सतस्तु स्वरूपस्य ब्रह्मणो द्विजसत्तम॥ य
धीति मानं यन्तस्य तस्मिन्नेव च वस्तुनि॥ नाम्नां सहस्रं लोकानामुपकारकरं शृणु॥ निमित्तभ
तेयो नाम्नां भेदिस्य तदुदीरणात्॥ विभिन्नान्येव साध्यंते फलानि द्विजसत्तम॥ यथेभिमज्ञा
म तस्य तत्रस्मिन्नेव च वस्तुनि॥ सपिंकं पुरतश्च व्याघ्रो भीमस्य कूरेषु वस्तुषिति॥ श्रीविष्णुधर्मवचनात्॥ या
निनामानि गौणानि यद्यपि परस्य ब्रह्मणः संबंधयष्टी क्रियागुणजातिरूपाणांशब्दप्रवृत्ति
हेतूनां निमित्तवाक्यादीनां वासंभवः तथापि सगुणो॥ ब्रह्मणः सविकारे च सर्वात्मकत्वात्तेषां
शब्दप्रवृत्तिहेतूनां संभवात् सर्वे शब्दाः परस्मिन्पुंसि प्रवर्तंते तत्राह॥११॥ श्लोकः॥ यानि नामानि गौ
णानि विख्यातानि महात्मनः॥ ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये॥१२॥ टीका॥ यत्र यानि
नामानि गौणानि गुणयोगात्प्रवर्तमानानि॥ तानि तेषु यानि विख्यातानि प्रसिद्धानि ऋषिभिर्मंत्रद

र्षिभिस्तत्त्वदर्शिभिः परिगीतानि समंततः॥ परिमेव ख्यातेषु तत्र गीतानि परिगीतानि च महांश्चासा
वात्मा चेति महात्मा यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह॥ यच्चास्य संततो भावस्तस्मादात्मेति
कीर्त्यते इति वचनात्॥ अयमेव महान् महानात्मेति महात्मा तस्य महात्मनोऽस्याचिंत्यप्रभावस्य तानि
नामानि वक्ष्यामि॥ भूतये पुरुषार्थचतुष्टयसिद्धये पुरुषार्थचतुष्टयार्थिनामिति॥ अत्र नामसह
स्रेष्वादित्यादिशब्दनाम्नामर्थांतरे प्रसिद्धानामादित्यादीनां तद्विभूतित्वेन भेदात्तस्यैव स्तुतिरिति प्र
सिद्धार्थग्रहणेऽपि स्तुतित्वं॥ भूतात्मा चेंद्रियात्मा च प्रधानात्मा तथा भवति॥ आत्मा च परमात्मा च त्व
मेकः पंचधा स्थितः॥ ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च॥ नद्यः समुद्राश्च
स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य इति॥ श्रीविष्णुपुराणे॥ आदित्यानामहं विष्णुरित्यारभ्य॥ अथ
वा बहुनैतेन किं ज्ञातेन तवार्जुन॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यंतेन गीतोपनि
षदि भगवतैवोक्तं॥ ब्रह्मैवेदं विश्वं वरिष्ठं पुरुष एवेदं विश्वमित्यादिश्रुतिभिः॥ सर्वैकमतयो ब्रह्म
परामृतमित्यादिश्रुतेश्च॥ विश्वादिशब्दभेदानां पुनरुक्तानामपि वृत्तिभेदेनापि भेदान्न पौनरुक्त्यं॥
श्रीपतिर्माधव इत्यादीनां पर्यायकत्वे विशेषभेदान्न पौनरुक्त्यं॥ अथ पौनरुक्त्ये पौनरुक्त्यं न दोषाय नाम्नां

सहस्रस्य किमेकं दैवतमिति॥ एकदैवतविषयत्वात् यत्र पुल्लिंगशब्दप्रयोगस्तत्र विष्णुर्विशेषणीयः
यत्र स्त्रीलिंगशब्दप्रयोगस्तत्र देवता विशेष्यते॥ यत्र नपुंसकलिंगशब्दप्रयोगस्तत्र ब्रह्म विशेषणी
यं॥ ॐ विश्वमिति॥ यतः सर्वाणि भूतानीत्यारभ्य जगदुत्पत्तिस्थितिलयकारणस्य ब्रह्मण एकदैवतत्वे
नाभिहितत्वात्तदा तदुभयविधं ब्रह्म विश्वशब्देनोच्यते विशेषणं परावरे ब्रह्मणी विश्वशब्देनोच्यते
अस्य विश्वस्य जगतः कारणत्वेन विश्वमित्युच्यते॥ ब्रह्मादौ तु विश्वमिति कार्यप्रधानेन कारणग्रह
णं कार्यभूतविरंच्यादिनामभिरपि विभोः स्तुतिरुपपन्नेति दर्शयितुं वा तदा परस्मादपृथक्त्वं भिन्नमिदं वि
श्वं परमार्थतत्त्वेन॥ पुरुष एवेदं विश्वमित्यादिश्रुतेः॥ तद्भिन्नं न किंचित्परमार्थतः सदस्तीत्यर्थः॥
अथवा विशतीति विश्वं ब्रह्म॥ तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः॥ किं च विश्व संहृतौ विशंति भूता
न्यस्मिन्निति विश्वं ब्रह्म॥ यत्प्रयंत्यभिसंविशंतीति श्रुतिः॥ तस्मादिह सकलं जगत्कार्यभूतमशेषं विश
नात्यत्रापि वा लये विशतीत्युभयथापि विश्वं ब्रह्मेति श्रुतेः॥ अथ प्रणवो ध्यानमीडित्यारभ्य सर्वे वेदा यत्पदमाम
नंति॥ तपांसि सर्वाणि च यद्वदंति॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीमि॥ ओमित्येतत्॥
एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं॥ एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥ एतदेव सत्यकामः

परं चापरं च ब्रह्म यदोंकारः स्तु पञ्चम्यर्थः पुनरेतत्त्रिमात्रेणोमित्य तेनेवाक्षरेण परं पुरुषमभिध्यायीत ।
ओमिति ब्रह्म ॥ ओमितीदं सर्वं तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वा—
क् संतृण्णोंकार एवेदं सर्वमोमित्येतदक्षरमिदं सर्वमित्युपक्रम्य प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतं
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ॥ एवं हि प्रणवं
ज्ञात्वा व्यश्नुते तदनन्तरं प्रणवं ह्यीश्वरं विद्यात्सर्वस्य हृदये स्थितं सर्वव्यापिनमोंकारं मत्वा धीरो न
शोचति ॥ अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ॥ ओंकारो विदितो येन स मुनिर्नेतरो जन इत्यादि
माण्डूक्योपनिषत् ॥ ओं तदात्मा तोंतरात्मा ॥ ओं तत्सत् ॥ ओं तत्त्वं वेत्स्यतोन इत्यादिश्रुतिभिः ॥ ओं
मित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ॥१॥ प्रणवः सर्व
वेदेषु शब्दः खे पौरुषं नृषु ॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं ॥२॥ आद्यं यदक्षरं ब्रह्म त्रयी यस्मि
न्प्रतिष्ठिता । एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥ प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ॥ वाङ्मय
मं प्रणवं सर्वं तस्मात्प्रणवमभ्यसेदित्यादिस्मृतिभिश्च ॥ वाचा विष्णुः शब्देन ॥ ओंकारोऽभिधीयते ॥ वाच्य
वाचकयोरत्यन्ताभेदभावादिश्वमित्योंकार एव तद्ब्रह्मेत्यर्थः ॥ सर्वं खल्विदं ब्रह्म तज्जलानिति

शान्त उपासीतेति ॥ एतदुक्तं भवति ॥ यथात्मा तत्त्वेनेदं विकारजातं ब्रह्म ज्ञात्वा तल्लीनत्वान्न जात्वा च ।
न च सर्वस्यैकात्म्ये रागादयः संभवन्ति तस्मात्तत्र कान्त उपासीतेत्यादिश्रुतेः ॥ श्रूयतां धर्मसर्वस्वं श्रुत्वा
चैवावधार्यतां ॥ आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ आत्मौपम्येन सर्वत्र समं पश्यति
योऽर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो मतः ॥२॥ निर्गुणः परमात्मा च ॥ देहं संव्याप्य तिष्ठति ।
तमहं ज्ञानविज्ञेयं नावमन्ये न लंघये ॥ सुतागमेतीविदेयं तमहं भूतभावनं ॥ क्रमेयं त्वां तोरादेवं
कृतमानिवसामरो ॥४॥ बहुवेतालि भूतानि हृदयं कुर्वन्ति चेतनः ॥ शोभ्यान्यतो तिमोहेन व्याप्तानीतिम
जीविताः ॥५॥ एते चित्तरश्मो दैत्या विकल्पः कल्पितो मया ॥ कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां ममाद्य
विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् ॥ द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥१॥ समुत्सृ
ज्यासुरं भावं तस्माद्यूयं तथा वयं ॥ तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिं ॥२॥ सर्वत्र दैत्याः सम
तामुपेत समत्वमाराधनमच्युतस्य ॥ जन्म ज्ञानादिकास्त्वाततन नैसर्गिको मम ॥३॥ प्रभाव एव सामा
न्यो यस्य यस्याच्युतो हृदि ॥ अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा ॥४॥ तस्य पापागमस्तात
हेत्वभावान्न विद्यते ॥ कर्मणा मनसा वाचा परपीडां करोति यः ॥ तद्बीजं जन्म फलति प्रभूतं तस्य
चाशुभं ॥ सोऽहं न पापमिच्छामि न करोमि वदामि च ॥ चिन्तयन् सर्वभूतस्थमात्मन्यपि च केशवं ॥
शारीरं मानसं दुःखं दैवं भूतभवं तथा ॥ सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः ॥८॥

त एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ॥ कर्त्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिं ॥ ९ ॥ साम्येनोपप्रदानेन च
मैत्र्येदृशेन तथैव च ॥ उपायाः कथिता ह्येते मित्रादीनां च साधने ॥ १० ॥ तानेवाहं न पश्यामि मित्रा
दीन् तात मा कुपः ॥ साध्याभावे महाबाहो साधनैः किं प्रयोजनं ॥ ११ ॥ सर्वभूतात्मके तात जगन्ना
थे जगन्मये ॥ परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥ १२ ॥ जडानामविवेकानामस्वराणा
मपि प्रभो ॥ भाग्यभोग्यानि राज्यानि सन्त्यनीतिमतामपि ॥ १३ ॥ तस्माद्यतेत पुण्येषु यदीच्छेन्महतीं
श्रियं ॥ यतितव्यं समत्वे च निर्वाणमपि चेच्छता ॥ १४ ॥ देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ॥
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितं ॥ १५ ॥ एतद्विजानता सर्वं जगत्स्थावरजंगमं ॥ द्रष्टव्यमा
त्मवद्विष्णुर्यतोऽयं विश्वरूपधृक् ॥ १६ ॥ एवं ज्ञाते स भगवाननादिः परमेश्वरः ॥ प्रसीदत्यच्युत
स्तस्मिन् प्रसन्ने क्लेशसंक्षयः ॥ शंकरहिरण्यगर्भौ हरिर्भिन्नाविति न मंतव्यं ॥ विष्णोरंशं तु पश्य
ति ये मां ब्रह्माणमेव च ॥ कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वधः ॥ ये च मूढा दुरात्मानो भिन्नं
पश्यन्ति मां हरेः ॥ ब्रह्माणं च तथा तेषां भ्रूणहत्यासमं फलमिति ॥ भविष्यति पुराणे ॥ महेश्वर
वचनात् ॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

११।

इत्यादिवचनैश्च हिंसारहितेन स्तुतिनमस्कारादिकं कर्त्तव्यमिति दंभाद्यैस्तु विस्मयशब्देन वेदाभिधीय
ते वा ॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पाण्डवेति ॥ न चल
ति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे न हरति न च हन्ति किंचिदुच्चैः ॥ सितमनसं तम
वेहि विष्णुभक्तं ॥ विमलमतिरमत्सरः प्रशान्तः शुभचरितोऽखिलसत्त्वमित्रभूतः ॥ प्रियहितवचनो
ऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः ॥ सकलमिदं महं च वासुदेवः ॥ परमपुमान्परमे
श्वरः स एकः ॥ इति मतिरचला भवत्यनंते हृदयगते व्रज तान्विहाय दूरात् ॥ यमनियमविधूतक
ल्मषाणामनुदिनमच्युतसक्तमानसानां ॥ अपगतमदमानमत्सराणां व्रज भट दूरतरेण मानवानां ॥ इत्या
दिवचनैर्वैष्णवलक्षणस्यैवंप्रकारत्वाच्च ॥ हिंसादिरहितैर्विष्णोः स्तुतिनमस्कारादिकं कर्त्तव्यमिति ॥
हिंसादिरहितैर्विप्रैः ॥ श्रद्धया देयं ॥ श्रद्धयाग्निः समिध्यते इत्यादिश्रुतेः ॥ श्रद्धापूतं वदान्यस्य हतमश्र
द्धयेतरत् ॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥ अश्नोति यः श्रद्धामधीतमहुतमदक्षिणं यज्ञ
मदृत्विजं हुतं ॥ अश्रद्धया दत्तमसंस्कृतं च विभागास्त एते तव दैत्यसत्तम पुण्यमहेशिणे च ब्रह्म
द्विड्दृष्टिणं तथा ॥ क्रयविक्रयसक्तानां पुण्यं च यज्ञ ॥ अग्निहोत्रिणां ॥ अश्रद्धयान्वयदानं ददतो यजतां तथा ॥
तत्सर्वं तव दैत्येन्द्र मत्प्रसादाद्भविष्यति ॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च

तस्मैस्मने ऽहरस्त्यादि कृतिन्निष्कृ ॥ श्रद्धया स्तुति नमस्कारादिकर्तव्येता श्रद्धया स्तुति नमस्कारः ॥ ॐ तत्स
दिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥ इति भगवद्वचनात् ॥ स्तुति नमस्कारादिकर्म सात्विकं विगु
णमपि श्रद्धापूर्वकं ब्राह्मणो निधानत्रयप्रयोगेन सगुणं सात्विकं संपादितं भवति ॥ स्वात्मानं विष्णुं
ध्यात्वात्मस्वर्णं स्तुति नमस्कारादिकर्तव्यं ॥ नाविष्णुः कीर्तयेद्विष्णुं नाविष्णुर्विष्णुमर्चयेत ॥ नाविष्णुः
संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयादिति महाभारते कर्मकांडे ॥ सर्वावीर्त्यैतानि नामानि परस्य ब्र
ह्मणो न त्वेवमेनानि मानि वासुदेवस्य कीर्तयेत ॥ यं यं कामम्प्रति ध्यायेत्तं तमाप्नोत्यसंशयं ॥ सर्वान्का
मानवाप्नोति समाराधय जगद्गुरुं ॥ तन्मयत्वेन गोविंदमेत्य तत्तल्लभन्नाप्यथा ॥ तन्मयो वांछितान्कामा
न्वदमाप्नोति मानवः इति श्रीविष्णुधर्मोत्तरे ॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा वर्तमा
नोपि स योगी मयि वर्तते इति गीतायां ॥ अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः ॥ कारणकार्यजातं
ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वंद्वगता भवंति ॥ इति श्रीविष्णुपुराणे ॥ गुरोर्वा त्वपरैर्वा दोनिंदाय
त्र प्रवर्तते ॥ कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोन्यतः ॥ तस्माद्गुरुवैवाचार्यरूपेणावतिष्ठतीति व्या
सस्मृतेः ॥ वरं हुतवहज्वालापंजरांतर्व्यवस्थितिः ॥ न शौरिचिंताविमुखजनसंवाद संकटमिति कात्या
यनस्मृतिः ॥ यत्र देशे वासुदेवनिंदावास तत्र न कर्तव्यः इत्येतदुक्तं भवति ॥ यस्य देवे परा भक्तिर्यथा
देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति ॥ श्वेताश्वतरोपनिषद्मंत्रवर्णात् ॥

तत्सर्वं विलयं याति तोयस्थं लवणं यथा काकिंतस्य पथ मन्युगं नरकार्तिप्रदं तृणां ॥ प्रयाति विलयं सद्यः सकृद्य
न्नाक्तिस्मृतेः ॥ सकृत्स्मृतोपि गोविंदो नृणां जन्मशतैः कृतं पापं हरति सूर्योवात मोरात्रिगतं यथा हरौ गुरौ च
परमभक्तिः कार्येति ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरि
व ॥ अज्ञानतो ज्ञानतो वा वासुदेवस्य कीर्तनं ॥ पापराशिं दहत्याशु तूलराशिमिवानलः ॥ सेयं वदनवल्मी
कवासिनी रसनोरगी ॥ या न गोविंद गोविंद गोविंदेति प्रभाषते ॥ पापवती मुखे तस्य जिह्वा रूपेण
२ तिष्ठति ॥ या न वक्ति दिवारात्रौ गुणान्गोविंदसंभवान् ॥ सकृदुच्चारितं येन हरिरित्यक्षरद्वयं ॥ बद्धः परिकर
स्तेन मोक्षाय गमनं प्रति ॥ एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ॥ दशाश्वमेधी पुनरे
ति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ एवमादि वचनैः श्रद्धाभक्तयोर्भावेपि नामसंकीर्तनं समस्तदुरितं नाश
यतीति किं वक्तव्यं ॥ सहस्रनामकीर्तनं समस्तदुरितं नाशयतीति ॥ मनसा वा ऽयं संकल्पयति ॥ अथ वा वा
चा व्याहरति ॥ यद्धि मनसा ध्यायति तद्वाचा वदतीति श्रुतिभ्यः ॥ स्मरणं ध्यानं च नामसंकीर्तनं तदर्थं त
यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिंतने विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोपि लोकोऽल्पकः ॥
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः ॥ किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥
इत्येवं विष्णुपुराणांते पराशरेणोपसंहृतं ॥ आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥ इदमेकं सुनिष्पन्न

28

ध्येयो नारायणः सदा॥ महाभारते भगवता श्रीवेदव्यासेनोपसंहृतं॥ हरिरेकः सदा ध्येयो भवद्भिः सत्वसंस्थि
तैः॥ ओमित्येवं सदा विप्राः पठत ध्यात केशवमिति॥ श्रीहरिवंशे कैलासयात्रायां॥ हरिरेकः सदा ध्ये
यस्त्युक्तं महेश्वरेणापि नारायणेति यस्मात्सेवदनेनाम मंगलं॥ नारायण समस्तेति वत्सं गौरिव वत्सले
ति॥ एतत्सर्वमभिप्रेत्य॥ एष मे सर्वधर्माणां धर्मोधिकतमो मतः इत्यादिकमुक्तं॥ किमेकं दैवतं लोके किं वाप्ये
कं परायणं॥ यतः सर्वाणि भूतानि इत्यादिना॥ यं पृष्टो कं तदिष्टशब्देनोक्तमिति व्याख्यातं ततः किं मित्या
कांतायत्माह॥ विष्णुरिति॥१३॥ श्लोकः॥ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः॥ भूतकृद्भूतभृद्भावो भूता
त्मा भूतभावनः॥१४॥ टीका॥ यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः॥ तस्मादेवोच्यते विष्णुर्वि
शेर्द्धातोः प्रवेशनादिति विष्णुपुराणे॥ तथा च ऋग्वेदे॥ विष्णोरस्य जानंतो नाम चिद्विवक्तन महस्ते वि
ष्णो सुमतिं भजामह इत्यादिवाक्यैर्विष्णोर्नामसंकीर्तनं॥ सम्यग्ज्ञानप्राप्तये विहितं वेवेष्टि व्याप्नोती
ति विष्णुर्विशेर्द्धातो व्याप्यभिधायिनः विष्णुप्रत्ययांतस्य रूपं विष्णुरिति॥ यच्च किंचिज्जगत्सर्वं दृश्यते
श्रूयतेपि वा॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति ब्रह्मनारायणे इति व्याप्ति श्रुतेः॥ देश
कालवस्तुपरिच्छेदशून्यस्तत्त्वपि॥ शं विशिष्टैर्वानुकंपत्वयं तस्य रूपं व्याप्तमेरोदसी पापिकांति.
श्वाप्यधिकस्थिता॥ कमलाज्ञाप्यहं विष्णुरित्यभिसंज्ञितः॥ इति महाभारते॥ यद्वद्देशेन वषट्क्रिया ९३

29

स वषट्कारः॥ यस्मिन्यज्ञे वा वषट्क्रिया यज्ञो वै विष्णुरिति श्रुतेः॥ स यज्ञो वषट्कारादिमंत्रात्मना देवान्
प्रीणयतीति वा वषट्कारः प्रजापतिश्च वषट्कारश्चेति देवताः॥२॥ भूतं च भव्यं च भवच्चेति भूतभ
व्यभवंति तेषां प्रभुः भूतभव्यभवत्प्रभुः॥ कालभेदमनादृत्य सन्मात्र प्रतियोगिकमैश्वर्यमस्येति
प्रभुत्वं॥४॥ रजोगुणं समाश्रित्य विरिंचिरूपेण भूतानि करोतीति भूतकृत्कथ्यते हरिः॥ तमोगुण
माश्रित्य तद्वात्मना भूतानि कृंततीति कृणोति हिनस्तीति णोतीति वा भूतकृत॥५॥ विष्णुरूपेण
सत्वगुणमधिष्ठाय भूतानि बिभर्ति धारयति पोषयतीति वा भूतभृत॥६॥ प्रपंचरूपेण भवतीति केवलं
भवत्येवेति वा भावः भवनं भावः सत्तात्मको वा॥७॥ भूतानामात्मांतर्यामीति भूतात्मा॥८॥ एष त आ
त्मांतर्याम्यमृत इति श्रुतेः॥९॥ भूतानि भावयति जनयतीति भूतभावनः॥ वर्द्धयतीति वा॥ भूतकृदादि निर्गु
णपरतंत्रत्वं प्राप्तं निषिध्यते भूतात्मेति १८ श्लोकः॥ पूतात्मा॥१०॥ परमात्मा च॥११॥ मुक्तानां परमा ग
तिः॥१२॥ अव्ययः॥१३॥ पुरुषः॥१४॥ साक्षी॥१५॥ क्षेत्रज्ञो॥१६॥ अक्षर एव च॥ टीका॥ पूतात्मा गुणजन्मकर्मदोषा
द्यसंस्पृष्ट आत्मा यस्य स पूतात्मा कर्मधारयो वा केवलो निर्गुणश्चेति श्रुतेः गुणोपरागः स्वेच्छ
तः पुतस्येह कल्प्यते नामानि॥१०॥ परमश्चासावात्मेति परमात्मा कार्यकारणविलक्षणो नित्य
शुद्धबुद्धमुक्तस्वभावः॥११॥ मुक्तानां परमा प्रकृष्टा गतिः गंतव्या देवता पुनरावृत्त्यसंभवात्तद्गतस्ये

ति मुक्तानां परमा गतिः॥ मामुपेत्य तु कौंतेय इति भगवद्वचने॥१२॥ न व्येतीत्यव्ययः नास्य व्ययो वि
नाशो विकारो वा विद्यत इत्यव्ययः॥ अजरोऽमर इति श्रुतेः॥१३॥ पुरं शरीरं नवद्वारपुरं तस्मिन् शेत इ
ति पुरुषः नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितं॥ व्याप्य शेते महात्मा यस्तस्मात्पुरुष उच्यत इति
महाभारते॥ यद्वाऽस्य सर्वस्मात्पूर्वमासात्तरयोगात्पुरुष शरीरादासीत् बुद्धिमेवेति विग्रहे कृत्वा उत्पादितः
पुरुषः॥ पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमिति श्रुतेः॥ पुरु बहु पूरीषु तत्कर्मफलानि पुरुषत्वेषु सीदतीति
वा॥ पुरूणि फलानि सनोति ददातीति॥ पुरूणि भुवनानि संहारे स्यति॥ अंतं करोतीति वा पूर्णत्वा
द्वा पुराणत्वाद्वा सदनाद्वा पुरुषः पूरणात्सदनाच्चैव ततोऽसौ पुरुषोत्तम इति पंचमवेदे १४ कर्मा
द्यव्यवधानेन स्वतंत्रयबोधेन स्वरूपाभेदेनेति वा॥ इतरे ते पशुपति सर्वाणि साक्षात् ईक्षते इति
संज्ञायामिति पाणिनीयवचनादिनिप्रत्ययः १५॥ क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः आतोऽनुपसर्गे
क इति कप्रत्ययः क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारतेति वचनात् क्षेत्राण्यपि शरीराणि तेषां
चैव यथा स्वयं तानि वेत्ति सम्यग्योगात्ततः क्षेत्रज्ञ उच्यते इति विष्णुपुराणे १६ स एव न क्षरती
त्यक्षरः परमात्मा अश्नोतेरक्षरोतेर्वा सरप्रत्ययांतस्य रूपमक्षरमिति॥ एवकारात्क्षेत्रज्ञाक्षर

योरभेदः परमार्थतः तत्त्वमसीत्यादिश्रुतेश्च कार्यव्यवहारिको भेदः प्रसिद्धेरप्रमाणत्वात्॥११॥ त
त्रज्ञपरमात्मनोर्भेदः १७॥ श्लोकः योगो योगविदां नेता १८ प्रधानपुरुषेश्वरः २ श्रीमान् २२ केशवः
२३ पुरुषोत्तमः २४ टीका॥ ज्ञानेंद्रियाणि सर्वाणि निगृह्य मनसा सह एकत्वभावना योगः क्षेत्रज्ञ
परमात्मनोः तदवाप्ततया योगः १९॥ तं योगं विचारयंति जानंति लभंते वा योगविदस्तेषां नेता
ज्ञानिनां योगक्षेममवहनादिनेति योगविदां नेता तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति
भगवद्वचनात्॥१९॥ प्रधानं प्रकृतिर्माया पुरुषो जीवः तयोरीश्वरः प्रधानपुरुषेश्वरः २ नारसिंह
वपुर्नरसिंहस्यावयवा यस्मिन्वपुषि लक्ष्यंते तादृशं वपुर्यस्य स नारसिंहवपुः २१ यस्य वक्षसि नि
त्यं वसति श्रीः स श्रीमान् २२ अभिरूपाः केशा यस्य स केशवः केशाद्वोऽन्यतरस्यामिति व प्रत्ययः प्रशंसा
यां यद्वा कश्च अश्च ईशश्च त्रिमूर्तयः केशास्ते यद्वशे वर्तंते स केशवः केशवधाद्वा केशवः यस्मा
त्त्वयैव दुष्टात्मा हतः केशी जनार्दन तस्मात्केशवनाम्ना त्वं लोके ज्ञेयो भविष्यसीति श्रीविष्णुपु
राणे कृष्णं प्रति नारदवचनं पृषोदरादित्वात् साधुकल्पना २२ पुरुषाणां मुक्तानां पुरुषोत्तमः
श्राक्षयोर्षे उत्तम इति निर्देशः अत्र न निर्द्धारणे इति षष्ठीसमासप्रतिषेधो न भवति जात्या
घनपेतयासमर्पत्वात् यत्र पुनर्जातिगुणक्रियापेतयापृथक् क्रियंते तत्रासमर्थाद्वि
धेः प्रवर्त्तते मनुष्याणां क्षत्रियः शूरतमः गवां कृष्णा गौः संपन्नक्षीरोत्तम अध्वगानां धा

वंतः शीघ्रतमास्त्येतेषु अपायवापंचमीसमासः तथा च भगवद्वचनं यस्मात्क्षरमतीतोहमक्षरादपि चोत्त 32
मः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति १९ श्लोकः सर्वः शार्वः ।२६। शिवः २७ स्थाणुः २८
भूतादिः २९ निधिरव्ययः ३० संभवो ३१ भावनो ३२ भर्ता ३३ प्रभवः ३४ प्रभुरीश्वरः ३५ ॥ टीका ॥ असत
तश्च सतश्चैव सर्वस्य प्रभवाप्ययात् सर्वस्य सर्वदा ज्ञानात्सर्वमेनं प्रचक्षत इति भगवद्व्यासव
चनात्सर्वः २ शृणोति सकलाः प्रजाः संहरति इति शार्वः २६। निस्त्रैगुण्यतया शुद्धत्वात् शिवः स
वृत्ता स शिव इत्यभेदोपदेशात् शिवादिनामभिर्हरिरेव स्तूयते स्थाणुरिति गुणरागद्वेषादयश्च प
स्मिन्निपुणादित्वात्साधुः २७ प्रलये स्थिरत्वात् स्थाणुः २८ भूतानामादिः कारणत्वादिति भूतादिः २९
प्रलये कालेऽस्मिन्सर्वं निधीयत इति निधिः कर्मण्यधिकरणे चेति कि प्रत्ययः अव्ययनिधिरिति विशेष्य
ते अव्यय इति अनश्वरो निधिरित्यर्थः ३० स्वेच्छया समीचीनं भवनं यस्य स संभवः धर्मसंस्थापनार्थाय संभ
वामि युगे युग इति भगवद्वचनात् तथा इच्छया विनाशमितस्य साधूनां रक्षणाय चस्येव ध्या
संभवाम्येवं गर्भदुःखविवर्जित इति च ३१ सर्वेषां भोक्तृणां फलानि भावयतीति भावनः सर्व
फलप्रदातृत्वं फलमत उपपत्तेरित्यत्र प्रतिपादितं ३२ प्रपंचस्याधिष्ठानत्वेन धारणाद्भर्ता
३३ प्रकर्षेण महाभूतान्यस्माज्जायंते प्रभवः । प्रकृष्टो भवो जन्मास्येति प्रभवः ३४ ॥

सर्वासु क्रियासु सामर्थ्यातिशयात्प्रभुः ३५ निरुपाधिकमैश्वर्यं यस्यास्तीतीश्वरः एष सर्वेश्वर 33
इति श्रुतेः ३६ १७ श्लोकः स्वयंभूः ३७ शंभुरादित्यः ३९ पुष्कराक्षो ४० महास्वनः ४१ अनादिनिधनो
४२ धाता ४३ विधाता ४४ धातुरुत्तमः ॥ ४५ ॥ १८ टीका ॥ स्वयमेव भवति जायत इति भावयतीति स्वयं
भूः स एष स्वयमुद्भावीति मानवं वचनं यः सर्वेषामुपरि भवति यश्चोपरि भवतीति स स्वयंभूः
परिभूः स्वयंभूरिति मंत्रवर्णात् अपवात्स्वयंभूः परमेश्वरः स्वयमेव स्वतंत्रो भवतीति न पर
तंत्रः पराञ्चि खानि व्यतृणत्स्वयंभूरिति मंत्रवर्णात् ॥ तस्मात्परांच पश्यति नांतरात्मन्निति श्रुतेः
भक्तानां शं सुखं भावयतीति शंभुः ३८ आदित्यमंडलांतःस्थो हिरण्मयः पुरुष आदित्यः द्वा
दशादित्येषु विष्णुर्वा आदित्यानामहं विष्णुरिति स्मृतेः अदितेरखंडिताया अयं पतिरिति वाऽयं
वा अदितिर्महादेवी विष्णुपत्नीति श्रुतेः यथा आदित्य एक एवानेकेषु जलभाजनेषु अनेकवत्
प्रतिभासते एवमनेकशरीरेष्वेक एवात्मानेकवत्प्रतिभासत इत्यादित्यसाधर्म्याद्वा आदित्यः
३९ पुष्करेणोपमिते अक्षिणी यस्य स पुष्कराक्षः ४० महानूर्जितः स्वनो नादः श्रुतिलक्षणो यस्य
स महास्वनः सन्महदित्यादिना समासे कृते आन्महतः समानाधिकरणजातीययोरित्या
त्वं अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इत्यादिश्रुतेः आदि

34

जन्म निधनं विनाशो द्वयं यस्य न विद्यते सोयमनादिनिःधनः ४२ अनंतादिरूपेण विश्वं दधा
ति बिभर्त्ति वा धाता उच्यते ४३ कर्मणां तत्फलानां च कर्त्ता विधाता अनंतादीनपि धारकत्वाद्वि
शेषेण दधाति वा विधाता ४४ धातुरुत्तम इति नामैकं सविशेषणं॥ समानाधिकरणेन सर्वधा
तुभ्यः पृथ्व्यादिभ्य उत्कृष्ट विधाता धातुरुत्तमः हरिः इत्यर्थः धातुर्विरिंचेत कृष्ण इति वा नाम
द्वयं वा कार्यकारणप्रपंचधारणात् चिदेव धातुरुत्तमः सर्वेषामुद्भूतानामतिशयेनोत्कृष्टत्वा
द्धातुरुत्तमः ४५ १८ श्लोकः अप्रमेयो ४६ हृषीकेशः ४७ पद्मनाभो ४८ मरप्रभुः ४९ विश्वकर्मा ५०
मनुः ५१ त्वष्टा ५२ स्थविष्ठः स्थविरो ध्रुवः ५४ १९ ॥ टीका ॥ अप्रमेयः शब्दादिरहितत्वान्न प्रत्यक्ष
गम्यः ४० नाप्यनुमानविषयः तद्व्याप्तलिंगाभावान्नाप्युपमानसिद्धो निर्विभागत्वे
न सादृश्याभावात् नाप्यर्थापत्तिग्राह्यस्तद्विनानुपपद्यमानस्यासंभवात् नाप्यभावगोचरो
भावत्वेनावगमादभावसाक्षित्वाच्च एवं प्रमाणस्यागोचरः नापि शास्त्रप्रमाणस्य वेद्यः प्रमाणजन्या
तिशयाभावात् यद्येवं शास्त्रयोनित्वं कथमुच्यते ॥ प्रमाणादिसाक्षित्वेन प्रकाशस्वरूपस्य
प्रमाणाविषयत्वेऽध्यस्तातद्रूपनिवर्त्तकत्वेन शास्त्रप्रमाणकत्वमित्यप्रमेयः ४६ हृषीकेशः
साक्षित्वात् हृषीकाणींद्रियाणि तेषामीशः क्षेत्रज्ञरूपभाक् यद्वा हृषीकाणींद्रियाणि

35

यस्य वशे वर्त्तते स परमात्मा हृषीकेशः यस्य वा सूर्यरूपस्य चंद्ररूपस्य जगत्प्रीतिकरा हृष्टाः केशाः रश्म
यः स हृषीकेशः पृषोदरादित्वात् साधुत्वं तथा चोक्तं मोक्षधर्मे सूर्याचंद्रमसोः शश्वदंशुभिः केशि
संज्ञितैः बोधयत्स्वापयंश्चैव जगदुत्तिष्ठते पृथक् बोधनात्स्वापनाच्चैव जगतो हर्षणं भवेत् अग्नि
षोमकृतैरेवं कर्मभिः पांडुनंदन हृषीकेशोहमीशानो वरदो लोकभावन इति ४७ सर्वजगत्कार
णं पद्मं नाभौ यस्य पद्मनाभः॥ अजस्य नाभावध्येकमर्पितमिति श्रुतेः पृषोदरादित्वात् सा
धुत्वं ४८ अमराणां प्रभुः अमरप्रभुः॥४९ विश्वं कर्म क्रिया यस्य स विश्वकर्मा क्रियत इति जगत्क
र्म विश्वं कर्म यस्येति वा विश्वकर्मा विमातीयादिति त्वायेति श्रुतेः विश्वकर्माणः त्वष्टुः सादृश्या
द्वा विचित्रनिर्माणशक्तिमत्त्वाद्वा विश्वकर्मा ५० विश्वमननान्मनुः ५१ तक्षतेस्तनूकरणा
र्थात्त्वष्टा विश्वसंहारसमये सर्वभूततनूकरणात्त्वष्टा ५२ अतिशयेन स्थूलः स्थविष्ठः
५३ पुराणः स्थविरः ॥ वयसा स्थविरस्य तामेति वृद्धवचनात् वयोवचनो वा वयोवस्थादित्वात्स्थ
स्थविरत्वात् ध्रुवः स्थविरो ध्रुवः इत्येकमिदं नाम सविशेषणं ५४ १९ ॥ श्लोकः अग्राह्यः ५५ शा
श्वतः ५६ कृष्णो ५७ ॥ लोहिताक्षः ॥ ५८ प्रतर्दनः ॥ ५९ ॥ प्रभूतः ६० ॥ त्रिककुब्धाम ६१ पवित्रं ६२
मंगलं परं ६३ ॥ २० ॥ टीका ॥ सर्वेरिंद्रियैर्न गृह्यते इत्यग्राह्यः यतो वाचो निवर्त्तंते अप्राप्य मन

सालहेति श्रुतेः ५५ शाश्वतः सर्वेषु भूतेषु कालेषु कार्येषु भवतीति शाश्वतः शाश्वतं शिवमच्युत
मिति श्रुतेः ५६ सदानंदात्मकः कृष्णः कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः विष्णुस्तद्भाव
योगाच्च कृष्णो भवति शाश्वत इति व्यासवचनात् सदानंदात्मकत्वात् कृष्णः तथा च महाभारते॥
कृषामि पृथिवीं पार्थ भूत्वा कार्ष्णायसो हलः कृष्णो वर्णश्च मे यस्मात्तस्मात्कृष्णोऽहमर्जुन इति वा
कृष्णः ५७॥ लोहितेऽक्षिणी यस्य स लोहिताक्षः॥ स आवृषभो लोहितान्त इति मंत्रवर्णात् ५८॥
प्रलये भूतानि हिनस्तीति प्रतर्दनः। ब्रीहिहि साक्षी ५९ ज्ञानैश्वर्यादिभिर्गुणैः संपन्नः प्रभूतः
६० ऊर्ध्वाधोमध्यभेदेन त्रयाणां लोकानां तिसृणां ककुभामपि धामेति ककुद्धामैकमेदं ना
म ६१॥ येन पुनाति यो वा पुनाति ऋषिर्देवता वा पुनाति तत्पवित्रं पवित्रं जुं तस्मात् त्रायत इति वा प
वित्रं पूजः संज्ञायां कर्तरि च ऋषिदेवतयोरिति भगवत्पाणिनिस्मरणादिति तत्र प्रत्ययः ६२॥
शु अभाविनिरवद्ये तनोति शुभसंततिं स्मृतिमात्रेण पुंसां ब्रह्म तन्मंगलं विदुरिति विष्णुपुरा
णवचनात् कल्याणरूपत्वाद्वा मंगलं॥ सर्वभूतेभ्य उत्कृष्टत्वात्परं ब्रह्म सर्वभूतेभ्यः उत्कृष्टं मंग
लं परमित्येकमिदं नाम सविशेषणं ६३ २० श्लोकः ईशानः प्राणदः ६५ प्राणः ६७ ज्येष्ठः ६८

श्रेष्ठ प्रजापतिः ६९॥ हिरण्यगर्भो ७० भूगर्भो ७१ माधवो मधुसूदनः॥ ईशः सर्वभूतानां नियंतृत्वादी
शानः ६४ प्राणान्ददाति चेष्टयतीति प्राणदः को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्या
दिति श्रुतेः यद्वा प्राणान् कालात्मना द्यति खंडयतीति प्राणदः यद्वा प्राणान् — पयति शोधयतीति वा प्रा
णदः ६५ प्राणितीति प्राणः क्षेत्रज्ञः परमात्मा वा प्राणस्य प्राणमिति श्रुतेः मुख्यप्राणो वा ६६ वृद्धतमो
ज्येष्ठः ज्येष्ठेऽप्यधिकारे वृद्धस्य चेति वृद्धशब्दस्य ज्यादेशविधानात् सर्वकारणत्वाद्वा ज्येष्ठः ६७ प्रशस्यत
मः श्रेष्ठः प्रशस्यस्य श्र इति श्रादेशविधानात् प्राणो वा ज्येष्ठश्च श्रेष्ठश्चेति श्रुतेः मुख्यप्राणो वा ज्ये
ष्ठश्रेष्ठयोरधिकारात् सिद्धत्वात् सर्वकारणत्वाद्वा ज्येष्ठः सर्वातिशायित्वाद्वा श्रेष्ठः ईश्वरः ईश्वरत्वेन सर्वासां
प्रजानां पतिः प्रजापतिः ६८ हिरण्मयांडांतर्वर्तित्वाद्धिरण्यगर्भो विरिंच्यात्मा ब्रह्मा हिरण्यगर्भः स
मवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदिति मंत्रवर्णात् भूर्गर्भे यस्य स भूगर्भः ७१ मायाः श्रियो धवः मा
धवः मधुरिव विद्यावबोध्यत्वाद्वा माधवः मधुविद्यावबोध्यत्वादिति वा मौनाद्ध्यानाच्च यो
गाच्च विद्धि भारत माधवमिति व्यासवचनाद्वा माधवः ७२ मधुनामानं दैत्यं सूदितवानिति मधुसूदनः॥
विष्णुकर्णोद्भवं चापि मधुं नाम महासुरं ब्रह्मणोऽपचितिं कुर्वन् जघान पुरुषोत्तमः तस्य तावद्वधा
देव देवदानवमानवाः मधुसूदन इत्याहुरृषयश्च जनार्दनमिति महाभारते ७३॥२०॥ श्लोकः।

ईश्वरो ॥७४॥ विक्रमी ॥७५॥ धन्वी ॥७६॥ मेधावी ॥७७॥ विक्रमः ॥७८॥ क्रमः ॥७९॥ अनुत्तमो दुराधर्ष ॥८०॥
कृतज्ञः ॥८१॥ कृति ॥८२॥ रात्मवान् ॥२४॥२२॥ टीका ॥ सर्वशक्तिमत्वेश्वरः ॥७४॥ विक्रमः शौर्यं तद्यो-
गाद्विक्रमी ॥७५॥ धनुरस्यास्तीति धन्वीति व्रीह्यादित्वादिनिः ॥ रामः शस्त्रभृतामहमिति भग-
वद्वचनात् ॥७६॥ मेधा बहुग्रंथधारणसामर्थ्यं यस्यास्तीति स मेधावी अस्मायामेधा-
स्रजो विनिरिति विनिप्रत्ययः ॥७७॥ विचक्रमे जगदिदं तेन विक्रमो विना गरुडेन पतत्रिणा क्रम-
णाद्विक्रमः ॥७८॥ क्रमणहेतुत्वात् क्रमः क्रांतो विष्णुरिति मनुवचनात् ॥७९॥ अविद्यमान उत्त-
मो यस्मात्सोऽनुत्तमः ॥ यस्मात्परं नापरमस्ति किंचिदिति श्रुतेः ॥ न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो
इति स्मृतेश्च ॥८०॥ दैत्यादिभिर्धर्षयितुं न शक्यत इति दुराधर्षः ॥ प्राणिनां पुण्यात्मकलक्षणं कर्म कृतं जा-
नातीति कृतज्ञः ॥८१॥ पुरुषप्रयत्नः कृतिः क्रिया च तद्धि सा वा कृतिरुच्यते सर्वात्मकत्वात्तदाधारत-
या लक्ष्यते — त्येति कृतिः ॥८२॥ स्वमहिम्नि प्रतिष्ठितत्वादात्मवान् ॥ स भगवान्कस्मिन्प्रतिष्ठित इति तद
ति ॥ स्वे महिम्नीति श्रुतेः ॥८४॥ २२॥ श्लोकः ॥ सुरेशः शरणं ॥८६॥ शर्म ॥८७॥ विश्वरेताः ॥८८॥ प्रजाभवः
८९॥ अहः ॥९०॥ संवत्सरो ॥९१॥ व्यालः ॥९२॥ प्रत्ययः ॥९३॥ सर्वदर्शनः ॥९४॥ २३॥ टीका ॥ सुराणां देवा-
[illegible]नां चेशः सुरेशः ॥८५॥ आर्तानामार्तिहरणत्वाच्छरणं ॥८६॥ परमानंदरूपत्वाच्छर्म ॥

८७॥ विश्वस्य कारणत्वाद्विश्वरेताः ॥८८॥ सर्वाः प्रजा यत्सकाशादुद्भवंतीति प्रजाभवः ॥८९॥ प्रकाश-
पत्वादहः ॥९०॥ कालात्मना स्थितो विष्णुः संवत्सर उच्यते ॥९१॥ [illegible]भुजगवद्ग्रहीतुमशक्यत्वा-
द्व्यालः ॥९२॥ प्रतीतिः प्रज्ञेति प्रत्ययः ॥ प्रज्ञानं ब्रह्मेति श्रुतेः ॥९३॥ सर्वसंवेदनात्मकानि दर्श-
नानि प्रत्यक्षाणि सर्वाण्यस्येति यस्य स सर्वदर्शनः सर्वात्मकत्वाद्विश्वतश्चक्षुर्विश्वात-
त्पादिति श्रुतेः ॥९४॥ २३॥ श्लोकः ॥ अजः ॥९५॥ सर्वेश्वरः ॥९६॥ सिद्धः ॥९७॥ सिद्धिः ॥९८॥ सर्वादिः ॥९९॥
रच्युतः ॥१००॥ वृषाकपिः ॥१०१॥ रमेयात्मा ॥१०२॥ सर्वयोगविनिःसृतः ॥ २४॥ टीका ॥ सर्ववस्तुषु संवि-
भज्य न ॥ जायतेऽत्यजः ॥ न जायते न जातो न जनिष्यतीति श्रुतेः ॥ न जातोऽहं न जायेऽहं न जनिष्ये क-
दाचन नेत्रेतः सर्वभूतानां तस्मादहमजः स्मृत इति महाभारते ॥९५॥ सर्वेषामीश्वराणामपीश्वरत्वा-
त्सर्वेश्वरः ॥ एष सर्वेश्वर इति श्रुतेः ॥९६॥ नित्यं निरवधिस्वस्वरूपत्वात्सिद्धः ॥९७॥ सिद्धिर्नेपिरितिशास्त्र-
कारः ॥ नित्यं संविद्रूपत्वात्सिद्धिः निरतिशयफलरूपत्वाद्वा सिद्धिः ॥ स्वर्गादीनां विनाशित्वादफल-
त्वं सर्वं तत्तु स्वरूपनित्यत्वं संविद्रूपत्वात्सिद्धिः ॥९८॥ सर्वभूतानामादिकारणत्वादिति सर्वादिः ॥
९९॥ स्वरूपसामर्थ्येन न च्युतो न च्यवते न च्यविष्यतेऽयः सोऽच्युतः ॥ शाश्वतं शिवमच्युतमिति श्रुतेः ॥
तथा भगवद्वचनं ॥ यस्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा इति ॥१००॥ इति नामशतमात्रं विवृतं ॥

विश्वंपरमात्मानारसिंहवपुःसंभवोमहास्वनोमनुःत्रिककुद्धामभूगर्भोदुराधर्षःसंवत्सरःदशकादीना
मानि॥वर्षणात्सर्वकामानांधर्मोवृषः॥कंतोयंपादैःपिबत्यादितिकपिर्वराहःवृषःकपिःवृषरूप
त्वात्कपिरूपत्वाच्चवृषाकपिः॥कपिर्वराहःश्रेष्ठश्चधर्मश्चवृषउच्यते॥तस्माद्वृषाकपिंप्राहकश्यप
पोमांप्रजापतिरितिव्यासवचनम्॥१०१॥एतावानितिमातुंपरिच्छेत्तुंनशक्यतआत्मायस्येतिसोऽ
मेयात्मा॥१०२॥सर्वसंबंधाद्विनिर्गतःसर्वयोगविनिःसृतः॥असंगोह्ययंपुरुषइतिश्रुतेः॥नानाशास्त्रोक्त
योगादवगतत्वाद्वासर्वयोगविनिःसृतः॥अथवासर्वेभ्योयोगेभ्यश्चित्तनिरोधेभ्योविनिःसृतः॥
अनिर्गतःतत्रस्थितःसर्वयोगविनिःसृतः॥१०३॥२४॥श्लोकः॥वसुः॥४॥वसुमनाः॥५॥सत्यः॥६॥
समात्मा॥७॥सम्मितः॥समः॥९॥अमोघः॥१०॥पुंडरीकाक्षो॥११॥वृषकर्मा॥१२॥वृषाकृतिः॥१३॥१५॥
टीका॥वसतिसर्वभूतान्यत्रतेष्वयमपिवसतीतिवसुः॥वसूनामस्मिपावकश्चेत्युक्तोवावसुः॥१४॥
वसुशब्देनधनवाचिनाप्रशस्तंलक्ष्यतेप्रशस्तंमनोयस्यसवसुमनाः॥रागद्वेषादिभिःक्लेशैर्मदादिभि
रुपक्लेशैश्चयतोनकलुषितंचित्तंततस्तन्मनःप्रशस्तं॥१५॥१०५॥अवितथरूपत्वात्परमात्मासत्यः
सत्यंज्ञानमनन्तंब्रह्मेतिश्रुतेः॥मूर्त्तामूर्त्तात्मकत्वाद्वासच्चत्यच्चाभवदितिश्रुतेः॥सदितिप्राणा
स्तीत्यन्नमादित्योदिवाकरस्तेनप्राणादनादित्यत्वंसत्त्वाद्वा॥सदितिप्राणास्तीत्यन्नंयमित्यसावादि

त्यइतिश्रुतेः॥सत्यवचनंसाधुत्वाद्वासत्यमुच्यते॥१०६॥सम आत्मामनोयस्यरागद्वेषादिभिरदूषितःसमा
त्मा॥सर्वभूतेषुसमएकआत्मावासमात्मा॥एषतआत्मेतिविद्यादितिश्रुतेः॥१०७॥सर्वैरर्थजातैरप
रिच्छिन्नोमितः॥यद्वासर्वैरर्थजातैःपरिच्छिन्नोमितइतिसंमितः॥१०८॥सर्वकालेषुसर्वविकाररर
हितत्वात्समः॥मायालक्ष्म्याचसहवर्त्ततइतिसमः॥पूजितःस्तुतःसंस्मृतोवासर्वंफलंददातीतिन
वृथाकरोतीत्यमोघः॥अवितथसंकल्पत्वाद्वा॥सत्यसंकल्पइतिश्रुतेः॥११०॥हृदयस्थंपुंडरीकंअ
श्नुतेव्याप्नोतितत्रोपलक्ष्यतइतिपुंडरीकाक्षः॥हृत्पुंडरीकंपुरमध्यमस्थमितिश्रुतेः॥अक्षिणीपुंडरीक
संकाशेअस्येतिवा॥१११॥धर्मार्थाकृतिःशरीरंयस्येतिसवृषाकृतिः॥धर्मसंस्थापना
र्थायसंभवामियुगेयुगइतिभगवद्वचनात्॥११२॥२५॥श्लोकः॥रुद्रो॥१४॥बहुशिराः॥१५॥बभ्रुः॥१
६॥विश्वयोनिः॥१७॥शुचिश्रवाः॥१८॥अमृतः॥१९॥शाश्वतःस्थाणुः॥२०॥वरारोहो॥२१॥महात
पाः॥१२२॥२६॥टीका॥संहारकालेप्रजाःसंहरन्रोदयतीतिरुद्रः॥रुदंरातिददातीतिवारुद्रः॥रुद्
दुःखंदुःखहेतुंवाद्रावयतीतिरुद्रः॥रोदनाद्द्रावणाद्वारुद्रइत्युच्यते॥तस्माच्छिवःपरमकारणमितिलिंग
पुराणवचनात्॥११४॥बहूनिशिरांसियस्येतिबहुशिराः॥सहस्रशीर्षापुरुषइतिश्रुतेः॥११५॥
बिभर्त्तिसर्वान्लोकानितिबभ्रुः॥११६॥विश्वस्यकारणत्वेनविश्वयोनिः॥११७॥शुचीनिश्र
वांसिनामानिश्रवणीयान्यस्येतिशुचिश्रवाः॥११८॥नविद्यतेमृतंमरणमस्येत्यमृतः॥

अजरोऽमर इति श्रुतेः ११९॥ एतामृतस्त्रासौ स्थाणुश्चेत्येकं नाम॥ शाश्वतस्थाणुरिति १२०॥ वरआरोहो अंको
यस्य स वरारोहः वरमारोहणं यस्मिन्निति वा आगत्य न पुनरावृत्तिसंभवात्॥ न स पुनरावर्त्तते इति श्रुतेः॥
यं प्राप्य न निवर्त्तते इति भगवद्वचनात् १२१॥ महत्सुव्यविषयज्ञानं यस्य स महातपाः यस्य ज्ञानमयं तपः॥
इति मंत्रवर्णात्॥ ऐश्वर्यं प्रतापो वा महद्यस्येति महातपाः १२२।२३। श्लोकः सर्वगः २३ सर्वविद्भानुः २४॥
विष्वक्सेनो २५ जनार्दनः २६ वेदो २७ वेदविद् २८ अव्यंगो २९ वेदांगो ३० वेदवित् ३१ कविः ३२। ३२ टी
का॥ सर्वत्र गच्छतीति सर्वगः २३॥ कारणत्वेन व्यापकत्वात्सर्वत्र सर्वविदिति वा सर्ववित्॥ यः सर्वज्ञः स
र्वविदिति श्रुतेः भातीति भानुः तमेव भांतमनुभाति सर्वमिति श्रुतेः यदादित्यगतं तेज इति स्मृतेश्च
सर्वविच्चासौ भानुश्चेति सर्वविद्भानुरित्येकं नाम सविशेषणं २४ विष्वग्जित्यव्ययं सर्वतस्त्यपेः
विष्वगंचेति पलायते दैत्यसेना यद्रणोद्योगमात्रेण स विष्वक्सेनः २५॥ जनान्दुर्जनान्हिनस्ति
नरकादीनामयतीति वा जनैर्पुरुषार्थमभ्युदयनिःश्रेयसलक्षणं याचन इति वा जनार्दनः २६॥
वेदरूपत्वाद्वेदयतीति वेदः तेषामेवानुकंपार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञान
दीपेन भास्वतेति भगवद्वचनात् २७॥ [illegible] वेदं वेदार्थं विंदति वेत्ति वा वेदवित् वेदांतकृद्वे
दविदेव चाहमिति भगवद्वचनात् सर्वे वेदाः सर्वविदः सर्वाणि शास्त्राणि सर्वे यज्ञाः सर्व इज्या

श्च कृष्णो विदुः कृत्स्नं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्वयज्ञाः समाप्ता इति महाभारते अव्यंगो ज्ञानादिभिः
परिपूर्णः अविकल इत्युच्यते अव्यंगो व्यक्तिर्नास्तीति तेन स्यसोऽव्यंगो वा अव्यक्तोऽयमचिंत्यो
यमिति भगवद्वचनात् २९ वेदा अंगभूता यस्य स वेदांगः ३० वेदान्विविनक्ति विचारयतीति वेदवित्॥
३१ क्रांतदर्शी कविः सर्वदृक् नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतिभ्यः कविर्मनीषीति मंत्रवर्णात् ३२॥
श्लोकः लोकाध्यक्षः ३३ सुराध्यक्षो ३४ धर्माध्यक्षः ३५ कृताकृतः ३६ चतुरात्मा ३७ चतुर्व्यूहः ३८ श्चतु
र्दंष्ट्रः ३९ चतुर्भुजः ४० ।२५। टीका॥ लोकानध्यक्षयतीति लोकाध्यक्षः सर्वेषां लोकानां प्राधान्येनोपद्र
ष्टा ३३॥ लोकपालादिसुरगणं स्वाधिकारात्प्रच्युतस्थानां शत्रुवधेन निवारणाय ये तेनाशेषकार्य
विधानाय प्रत्यक्षत्वेनोपलभत इति सुराध्यक्षः ३४॥ धर्माधर्मौ साक्षात्पश्यतीति तेनानुरूपं फलं दातुं तस्मा
द्धर्माध्यक्षः सूक्ष्मदर्शी ३५॥ कृतश्च कार्यरूपेण अकृतश्च कारणरूपेणेति कृताकृतः सर्गादिषु
वृ[illegible]विभूतयश्चतस्र आत्मानोऽस्य संतीति चतुरात्मा ब्रह्मा दक्षादयः कालस्तथैवा
खिलजंतवः विभूतयो हरेरेता जगतः सृष्टिहेतवः विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज स्थि
तेर्निमित्तभूतस्य विष्णोरेता विभूतयः रुद्रः कालांतकाद्याश्च समस्ताश्चैव जंतवः चतुर्धा प्रल
यायैता जनार्दनविभूतय इति विष्णुपुराणे ३६ व्यूहात्मानं चतुर्धा वै वासुदेवादिमूर्तिभिः सृष्ट्

यादीन्यकरोनेष श्लोकः ॥ भ्राजिष्णुः ४१ ॥ भोजनं ॥ ४२ ॥ भोक्ता ॥ ४३ ॥ सहिष्णुः ४४ ॥ जगदादिजः ॥ ४५ ॥ अनघो ॥ ४६ ॥ विजयो
जेता ॥ ४७ ॥ विश्वयोनिः ॥ ४८ ॥ पुनर्वसुः ॥ ४९ ॥ २५ ॥ टीका ॥ प्रकाशकत्वाद्भ्राजिष्णुः ॥ ४१ ॥ भोज्यरूपतयार्थं प्रकृति
मायाभोजनमित्युच्यते ॥ ४२ ॥ पुरुषरूपेणान्तर्यामित्वेन सर्वाधिष्ठानतया तां प्रकृतिं भुंक्ते इति भोक्ता ॥ ४३ ॥ हिरण्या
क्षादीनसुरकरान् सहते यावत्प्रारब्धकालं तं सहते तदनु अभिभवतीति सहिष्णुः ॥ ४४ ॥ हिरण्यगर्भरूपेण
जगतः पूर्वमुत्पद्यते स्वयमिति जगदादिजः ॥ ४५ ॥ न विद्यते अघं यस्येत्यनघः अपहतपाप्मेति श्रुतेः ॥ ४६ ॥
विजयते ज्ञानवैराग्यैश्वर्यादिभिर्गुणैर्विश्वमिति विजयः ॥ ४७ ॥ यतोऽतिशेते जयति सर्वभूतानि स्वभावतो
ऽतो जेता ॥ ४८ ॥ विश्वं योनिर्यस्य सः विश्वयोनिः ॥ विश्वश्चासौ योनिश्चेति वा विश्वयोनिः ॥ ४९ ॥ पुनः पुनः शरी
रेषु वसतीति क्षेत्रज्ञरूपेणेति पुनर्वसुः विष्णुतात्मा जनार्दन इति व्यासवचनात् चतुर्व्यूहः २८ ॥ बृहत्वादंष्ट्रा
नुरो यस्येति चतुर्दंष्ट्रो नारसिंहविग्रहः यद्वा सद्दंष्ट्रयात् शृंगं दंष्ट्रेत्युच्यते चत्वारि शृंगा इति श्रुतेः २९ चत्वा
रो भुजा यस्य स चतुर्भुजः ३० श्लोकः उपेन्द्रो ५१ वामनः ५२ प्रांशुः ५३ अमोघः ५४ शुचिः ५५ ऊर्जितः ५६ ॥
अतीन्द्रः ॥ ५७ ॥ संग्रहः ॥ ५८ ॥ सर्गो धृतात्मा ५९ ॥ नियमो ६० ॥ यमो ॥ ६१ ॥ ३० ॥ टीका ॥ ममोपरि यथेन्द्रत्वं
स्थापितो गोभिरीश्वरः उपेन्द्र इति कृष्ण त्वां गास्यन्ति भुवि देवता इति हरिवंशे इन्द्रमुपगतोऽनुजत्वेनोपेन्द्रः
यद्वा उपरि इन्द्रः उपेन्द्रः ५१ ॥ बलिं वामनरूपेण याचितवानिति वामनः अपि भूतत्वानिति वामनः सम्यक्
मध्ये वामनमासीनं विश्वेदेवा उपासते इति मंत्रवर्णात् ५२ ॥ सम्यक् जग
[illegible]

पंक्रममाणः प्रांशुरभवदिति प्रांशुः नो येतु पतिनेह ते वामनो भूत वामनः सर्वदेवमयं रूपं दर्शयामास वै
प्रभुः भूतपादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी इत्यादि विश्वरूपं च दर्शयित्वा तस्य विक्रमतो भूमिं
चन्द्रादित्यौ स्तनान्तरे नभः प्रक्रममाणस्य नाभ्यां तौ समवस्थितौ ॥ दिवमाक्रममाणस्य जानुमूले व्यवस्थि
तौ इति प्रांशुत्वं हरिवंशे ५३ ॥ अमोघं चेष्टितं यस्येत्यमोघः ५४ ॥ स्मरतां स्तुवतामर्चयतां पावनत्वाच्छु
चिः अस्पर्शश्च महाः शुचिरिति मंत्रवर्णात् ५५ ॥ बलप्रकर्षशालित्वादूर्जितः ५६ ॥ अतीत्येन्द्रं स्थितो ज्ञा
नैश्वर्यादिभिः स्वभावसिद्धैरित्यतीन्द्रः ५७ ॥ सर्वेषां संहर्ता प्रतिसंहारात् संग्रहः ५८ ॥ सृज्यरूपतया सर्ग
हेतुत्वात् सर्गः ५९ एकरूपेण जन्मादिरहिततया धृत आत्मा येन स धृतात्मा ६० ॥ स्वेषु स्वेष्वधिकारेषु प्रजा
नियमतीति नियमः ६१ यम उपरमे अन्तर्यमतीति यमः ६१ ३० श्लोकः वेद्यो वैद्यः ६४ सदा योगी ६५
वीरहा ६६ माधवो ६७ मधुः ६८ ॥ अतीन्द्रियो ६९ ॥ महामायो ७० ॥ महोत्साहो ७१ महाबलः ॥ ७२ ॥ ३१ ॥ टीका ॥
निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यः ६३ ॥ वैद्यः सर्वविद्यानां वेदनाद्वैद्यः ६४ ॥ सदाविर्भूतस्वरूपत्वात्सदायो
गी ६५ स्वधर्मत्राणायासुरवीरान्वीर्यवतो हन्तीति वीरहा ६६ मायाविद्याया यः पतिर्माधवः मायाविद्या च
हरेः प्रोक्ता तस्या ईशितो भवान् तस्मान्माधवनामासि धवः स्वामीति कीर्तितः इति हरिवंशे मा लक्ष्मीर्धी
सरस्वती तस्य वतीति वा माधवः निपातनादीकारलोपः ६७ यथा मधु अमृतं परां प्रीतिमुत्पादयति
अयमपि तथेति मधुः ६८ शब्दादिरहितत्वादिन्द्रियाणामविषयत्वादतीन्द्रियः अशब्दमस्पर्शमिति श्रु

तेः ६९ मायाविनामपि मायाकारित्वान्महामाया मम माया दुरत्ययेति भगवद्वचनात् ७० जगदुत्पत्ति
स्थितिलयकरणे उद्युक्तत्वान्महोत्साहः ७१ बलवतामबलत्वान्महाबलः ७२ २१ श्लोकः महाबुद्धि ७३॥
महावीर्यो ७४ महाशक्ति ७५ महाद्युतिः ७६ अनिर्देश्यवपुः ७७ श्रीमान् ७८ अमेयात्मा ७९ महाद्रिधृ
क् ८० २२॥ टीका बुद्धिमतामपि बुद्धिमत्वान्महाबुद्धिः ७३ महदुत्पत्तिकारणमविद्यालक्षणं वीर्यमस्ये
ति महावीर्यः ७४ महती शक्तिः सामर्थ्यमस्येति महाशक्तिः ७५ महती द्युतिर्बाह्याभ्यंतरं चास्येति महा
द्युतिः स्वयंज्योतिरिति श्रुतेः ज्योतिषामपि तज्ज्योतिरित्याद्य ७६ इदं तदिति निर्देष्टुं न शक्यते परस्मै
स्वसंवेद्यत्वानिर्देश्यं वपुरस्येत्यनिर्देश्यवपुः ७७ सर्वैः प्राणिभिरमेया बुद्धिः परिमातुमशक्य
क आत्मा यस्य सोऽमेयात्मा ७९ महांतमद्रिं मंदरं गोवर्द्धनं वामृतमंथने गोरक्षणे धृतवानिति
महाद्रिधृक् ८० २२ श्लोकः महेष्वासो ८१ महीभर्ता ८२ श्रीनिवासः ८३ सतां गतिः ८४ अनिरुद्धः ८५॥
सुरानंदो ८६ गोविंदो ८७ विदांपतिः ८८ २३ टीका महानिष्वासः धनुर्यस्य स महेष्वासः ८१॥
एकार्णवाप्लुतां महीं देवीं बभारेति महीभर्ता ८२ यस्य वक्षसि अनपायिनी श्रीमूर्त्तिमती वसतीति स श्री
निवासः ८३ सतां वैदिकानां साधूनां पुरुषार्थसाधनप्राप्तिहेतुः सतां गतिः ८४ न केनापि प्रादुर्भावेषु
निरुध्यत इत्यनिरुद्धः ८५ सुरानानंदयतीति सुरानंदः ८६ नष्टां वै धरणीं पूर्वमविंदं वै गुहागतां गो
विंद इति तेनाहं देवैः सर्वैरभिष्टुतः स्ततः इति मोक्षधर्मवचनाद्गोविंदः अहं किलेंद्रो देवानां त्वं गवा

मिंद्रतां गतः गोविंद इति देवास्त्वां लोकाः स्तोष्यंति भुवि शाश्वतमिति गौरेषा भूः सप्पा वाणी तां च वेदयते भवान्
गोविंदस्तु ततो देव मुनिभिः कथ्यते भवानिति चक्रसंवादे ८७ गां वाणीं विंदति जानातीति ते गोविंदस्तेषां प
तिर्विशेषेणेति गोविंदांपतिः ८८ २३॥ श्लोकः मरीचिर्दमनो ९० हंसः। सुपर्णो ९२ भुजगोत्तमः ९३॥
हिरण्यनाभः ९४ सुतपाः ९५ पद्मनाभः ९६ प्रजापतिः ९७ टीका तेजस्विनामपि तेजस्वित्वान्म
रीचिः तेजस्विनामहमिति भगवद्वचनात् ८९ स्वाधिकारात्प्रमाद्यतीः प्रजाः दमयितुं शीलमस्येति
वैवस्वतादिरूपेण स दमनः ९० हंस इति तादात्म्यभावेन संसारबंधं हंतीति हंसः पृषोदरादित्वात्सा
धुत्वं हंति गच्छति सर्वशरीरेष्विति वा हंसः हंसः शुचिषदिति मंत्रवर्णात् ९१ सुष्ठु शोभनानि पर्णा
नि वेदपत्राणि यस्य स सुपर्णः शोभनपर्णत्वात्सुपर्णः शोभन धर्माधर्मरूपपर्णत्वात्सुपर्णः तौ द्वौ सुप
र्णाविति मंत्रवर्णात् शोभनं पर्णं यस्य स सुपर्णः पर्वतानामस्मीति भगवद्वचनात् ९२ भुजेन गच्छतां सर्प
नागादीनामुत्तमो भुजगोत्तमः ९३ हिरण्यमिव कल्याणी नाभिरस्येति रमणीयत्वाद्धिरण्यनाभित्वा
द्धिरण्यनाभः ९४ नरनारायणरूपेण बदरिकाश्रमे शोभनं तपश्चरतीति सुतपाः मनसश्चें
द्रियाणां चैवैकाग्र्यं परमं तप इति स्मरणात् ९५ पद्ममिव सुवर्त्तुलानाभिरस्येति हृदयपद्मस्य
नाभौ मध्ये प्रकाशनाद्वा पद्मनाभः पृषोदरादित्वाद्दीर्घ साधुत्वकल्पना ९६ प्रजानां पतिः

प्रजापतिः ९७ ३४ श्लोकः अमृत्युः ९८ सर्वदृक् ९९ सिंहः १०० संधाता १०१ संधिमान १०२ स्थिरः १०३ अजो दुर्मर्षणः
१०४ शास्ता १०५ विश्रुतात्मा १०६ सुरारिहा १०७ ३५ टीका यतो मृत्युर्विनाशस्तद्धेतुर्वा नास्य विद्यत इत्यमृत्युः ९८
प्राणिनां कृताकृतं सर्वं पश्यति स्वभावकेन बोधेनेति सर्वदृक् ९९ हिनस्तीति सिंहः पृषोदरादित्वात् साधुत्वं
मृगाणां च मृगेंद्रोहं इति भगवद्वचनात् इति द्वितीयं नाम्नां शतकं विवृतं वृषाकपिः १ पुंडरीकाक्षो २ वरारोहो ३
वेदविद्वाञ्जितसपत्नो ६ नियमो ७ यमो ८ महोत्साहो ९ महेष्वासो १० सिंहः ११ इति दशकं पूर्वादिनाम्नां नि
रः कर्मफलैः पुरुषान् संधत्त इति संधाता १ फलभोक्ता च स एवेति संधिमान् २ सदैकरूपत्वात् स्थिरः ३
अजति गच्छति क्षिपतीति वा अजः ४ मर्षितुं सोढुं दानवादिभिर्न शक्यत इति दुर्मर्षणः श्रुतिस्मृत्यादिभिः
सर्वेषामनुशिष्टिं करोतीति शास्ता ६ विशेषेण श्रुतः सत्यज्ञानादिलक्षण आत्मा अस्येति विश्रुतात्मा ७ सुरारीणां
हंतृत्वात् सुरारिहा ८ ३५ गुरुः ९ गुरुतमो १० धाम ११ सत्यः १२ सत्यपराक्रमः १३ निमिषो १४ निमिषः १५ स्र
ग्वी १६ वाचस्पतिरुदारधीः १७ ३६ ॥ टीका ॥ समस्तविद्यानामुपदेष्टृत्वात् सर्वेषां जनकत्वाद्वा गुरुः ९ विरि
ञ्च्यादीनामपि ब्रह्मविद्याप्रदायकत्वाद्गुरुतमः यो ब्रह्माणं विदधाति पूर्वमिति मन्त्रवर्णात् १० धाम ज्योतिः नारायणः परं
ज्योतिरिति मन्त्रवर्णात् सर्वकामानामास्पदत्वाद्वा धाम परं ब्रह्म परं धामेति श्रुतेः ११ सत्यवचनलक्षण
धर्मपरत्वात् सत्यः तस्मात् सत्यं परमं वदंतीति श्रुतेः सत्यस्य सत्यमिति वा सत्यः प्राणा वै सत्यं तेषामेष
सत्यमिति श्रुतेः १२ सत्योऽमोघः पराक्रमो यस्य स सत्यपराक्रमः १३ निमीलिते नेत्रे योगनिद्रार

तत्वान्निमिषः १४ नित्यप्रबुद्धस्वरूपत्वादनिमिषः मत्स्यरूपतया वानिमिषः १५ भूततन्मात्रात्मिकां वैज
यंत्याख्यां स्रजं मालां नित्यं बिभर्तीति स्रग्वी १६ वाचो विद्यायाः पतिर्वाचस्पतिः पुरोधसां च मुख्यं मां विद्धि
पार्थ बृहस्पतिमिति सर्वार्थविषया धीर्बुद्धिरस्येत्युदारधीः वाचस्पतिरुदारधीरिति पदद्वयात्मकमेकं नाम १७
श्लोकः अग्रणी १८ ग्रामणीः १९ श्रीमान् २० न्यायो २१ नेता २२ समीरणः २३ सहस्रमूर्द्धा २४ विश्वात्मा
सहस्राक्षः २६ सहस्रपात् २७ ३७ टीका अग्रं प्रकृष्टं पदं नयतीति मुमुक्षून् इत्यग्रणीः १८ भूतग्रामस्य नियंतृत्वा
द्ग्रामणीः १९ कांतिः सर्वातिशायिन्यस्येति श्रीमान् २० प्रमाणानुग्राहको भेदकारकस्तर्को न्यायः
२१ जगद्यंत्रनिर्वाहको नेता २२ श्वसनरूपेण भूतानि चेष्टयतीति समीरणः २३ सहस्राणि मूर्द्धानो
यस्य स सहस्रमूर्द्धा २४ विश्वस्यात्मेति विश्वात्मा २५ सहस्राण्यक्षीणि चक्षूंष्यस्य स सहस्राक्षः २६ सहस्रं
पादा अस्येति सहस्रपात् सहस्रशीर्षा पुरुष इति मन्त्रवर्णात् २७ ३७ श्लोकः आवर्तनो २८ निवृत्तात्मा
२९ संवृतः ३० संप्रमर्दनः ३१ अहः संवर्तको ३२ वह्निः ३३ अनिलो ३४ धरणीधरः ३५ ३८ टीका संसार
चक्रमावर्तयितुं शीलमस्येति आवर्तनः २८ संसारबंधनान्निवृत्त आत्मा स्वरूपं यस्य स निवृत्तात्मा २९ ॥
आच्छादिकयाऽविद्यया संवृतत्वात् संवृतः ३० सम्यक् प्रमर्दयति रुद्रकालादिविभूतिभिरिति संप्रमर्दनः
३१ सम्यगहः प्रवर्तनात् सूर्योऽहःसंवर्तकः ३२ हविर्वहनाद्वह्निः ३३ अनादिनिलयत्वादनिलः अनादाता

नलयः पाठांतरे वाऽनिलः ३४ शेषनागादिरूपेण दिग्गजादिरूपेण वराहरूपेण वा धरणीं धत्त इत्यतो धर
णीधरः ३५ ३४ श्लोकः सुप्रसादः ३६ प्रसन्नात्मा ३७ विश्वधृग्विश्वभुग्विभुः ३८ विभुः ४० सत्कर्ता ४१ सत्कृतः ४२ साधु
४३ र्जह्नुः ४४ र्नारायणो ४५ नरः ४६ ३५ टीका शोभनं प्रसादो यस्यापकारवतामपि शिशुपालप्रभृतीनां मोक्ष
प्रदत्वादिति सुप्रसादः ३६ रजस्तमोभ्यामकलुषितमंतःकरणमात्मास्येति प्रसन्नात्मा यद्वा प्रसन्नस्वभावः
करुणिकः कारुण्यादेव तत्स्वरूपत्वात्प्रसन्नात्मा अवाप्तसर्वकामत्वाद्वा प्रसन्नात्मा ३७ विश्वं
धारयतीति विश्वधृक् जिघ्रतेर्गन्धे ३८ विश्वं भुंक्ते अश्नाति भुजिर्निजस्वात्मनेपदं भुज्य इत्यर्थः विश्वं
भुनक्ति पालयतीति वा विश्वभुक् ३९ हिरण्यगर्भादिरूपेण विविधं भवतीति विभुः नित्यं विभुमि
मेत्र तिवचनात् ४० सत्करोतीति पूजयतीति वा सत्कर्ता ४१ पूजितैरपि परिपूजितः सत्कृतः ४२ न्यायप्रवृत्ततया
साधुः साधयतीति साध्यभेदानुपादानात्साध्यमात्रसाधको वा साधुः ४३ संहारसमये जनान्प्रकृतौ जन
यतीति जह्नुः जहातेर्विशुद्धोऽभक्तान्नयति परं पदं जह्नुः ४४ नरः परमात्मा ततो जातान्याकाशादीनि नाराणि
तान्येव सर्वसंसारचोरविषमंत्ररणाय मंत्रः अयमुक्तेनु भयप्रभुनयो मुदितानाराणात्मनेति व्याससवचनात्
नारसिंहे ॥४५॥ नयतीति नरः नयतीति नरः श्लोकः परमात्मा सनातनः इति व्यासवचनात् ... ५० ... सिद्धार्थः परसिद्धः
कल्पः ५३ सिद्धिदः ५४ सिद्धिसाधनः ५५ ॥ ४१ टीका ... संख्यातीता मोक्षदो न विद्यते साव संख्येयः ४७ ॥ अप्र
मेयः प्रमात्मास्वरूपमस्येति अप्रमेयात्मा ४८ आश्रितिर्येन सर्वं भुक्तं तवैद्रिश्यते नरावर्ते व्याप्य नारायणः विशिष्टतरति
मंत्रवर्णात् ॥ न जानातीति तव्याप्ति नारायणीति विदुः ॥ नारा ये वस्यायनं तस्मात्तेन नारायणः ॥ स्मृतं इति महाभारते
नराणां मयनं स्तान्नरः इति नारायणः यत्सुयं तस्मिन्संविशन्तीति श्रुतेः ॥ नराणामयनं यस्मात्तस्मान्नारायणः स्मृत
इति ब्रह्मवैवर्ते ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति मनुवच
नाद्या ॥ नारायणः यन्मरणस्य विशते इति विश्वतः परमं नित्यमिति श्रुतेः ४५ शिष्टं शासनं करोतीति शि
ष्टकृत् ॥ शिष्टान्करोति पालयतीति सामान्यवचनो धातुः विशेषवचनो हृष्टकृत् कारणानीला हरणे यथा न
इति वापि ष्टकृत् ५१ निरंजनः शुचिः ॥ सिद्धो निवृत्तो यमान्नवाद सिद्धार्थः ५१ कार्यं यथा
कारणात्मनाव्याप्तो यतस्तान्यस्यायनमिति नारायणः यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा सत्सकामः
इति श्रुतेः ५२ सिद्धो निष्पन्नः संकल्पोऽसौ सिद्धसंकल्पः सत्यसंकल्प इति श्रुतेः ५३ सिद्धिं फलं कर्तृभ्यः स्वाधि
कारानुरूपेण ददातीति सिद्धिदः ५४ सिद्धेः साधकत्वात्सिद्धसाधनः ५५ ४० श्लोकः वृषाही ५६ वृषभो ५७
विष्णुः ५८ वृषपर्वा ५९ वृषोदरः ६० वर्द्धनो वर्द्धमानश्च ६१ विविक्तः ६२ श्रुतिसागरः ६३ ४१ टीका वृषो धर्मः
पुण्यं तदेवाहो यस्य विशेषद्वादशाहादीनि वृषाहः सोऽस्यास्तीति वृषाही यद्वा राजाहः सविष्णुरेव जितिटच प्रत्ययः
समासांतः ५६ ॥ वर्षति कामानर्थिनेभ्यः इति वृषभः ५७ ॥ व्यासेनोक्तं विष्णुर्विक्रमणादिति स्मृतो विष्णुः ५८ ॥ वृष
रूपाणि सोपानपर्वाण्यारुह्य परं धामारुरुक्षोरित्यतो वृषपर्वा ५९ प्रजा वर्षतीवोदरमस्येति वृषोदरः वर्द्धय

नीति वर्द्धनः ६१ प्रपंचरूपेण वर्द्धते इति वर्द्धमानः ६२।६इति वर्द्धमानोपि प्रपंचो भवतीतीति विविक्तः ६३ श्रुतयः
सागरे इवात्र निधीयंते इति श्रुतिसागरः ६४।८१ श्लोकः सुभुजो दुर्द्धरो ६६ वाग्मी ६७ महेंद्रो ६८। वसुदो ६९। वसु
७०। नैकरूपो ७१। वृहद्रूपः ७२ शिपिविष्टः ७३। प्रकाशनः ७४।८२। टीका शोभना भुजा जगद्रक्षाकरा अस्येति सु
भुजः ६५ पृथिव्यादीन्यपि लोकधारकाण्यपि नैव धारयितुमशक्यानि धारयन् न केनचिद्धारयितुं शक्यत इति
दुर्द्धरः दुःखेन ध्यानसमये मुमुक्षुभिर्हृदि धार्यत इति वा दुर्द्धरः ६६ यतो यस्मान्निःसृता ब्रह्ममयी वाक् त
स्माद्वाग्मी महोत्साहाविरश्चीति महेंद्रः ईश्वराणामीश्वरः ६८। वसु कं ददातीति वसुदः।। अन्नादो वसुदान इति श्रु
तेः ६९। दीयमानं तद्वसु स एवेति वसुः आच्छादयत्यात्मानं स्वरूपं मायया वा वसु अंतरिक्षे एव सति नान्यत्रेत्यस्मा
त् वसुरंतरिक्षसदिति श्रुतेः ७० एकं रूपं न विद्यत इति अस्य नैकरूपः अनेकरूपः ७१ वृहन्महद् सुधा
धारणेन वसनेन वायुर्वा वसुः ज्योतींषि विष्णुर्भुवनानि विष्णुरित्यादिस्मृतेश्च ७१ यज्ञरूपेणेति शिपिविष्टः यज्ञ
र्पः ३ इंद्रो मायाभिः पुरुरूप ईयत इति श्रुतेः शिपयः पशवस्तेषु यः प्रतिष्ठति इति यज्ञरूपेणेति शिपिविष्ट इति वा शिपि
तत्त्वं विमहद्गाराद्रिरूपमस्येति वृहद्रूपः ७२ शिपयः रश्मयस्तेषु निविष्ट इतीति श्रुतेः शिपयो रश्मयस्तेषु निविष्ट इति वा शिपि
मूर्त्तिः।। यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः शिपयो रश्मयो मताः।
विष्ट इति वा शिपिविष्टः शैत्यात् स्वापो वा गावः शीतं वा रश्मय उच्यते।। तत्यानात् ... शिपयो रश्मयो मतः।
तेषु प्रवेशाद्विश्वेशः शिपिविष्टः प्रकाशनः ७४। सर्वेषां प्रकाशनशीलत्वात् प्रकाशनः ७४ श्लोकः ओजस्तेजो द्युति
धरः ७५ प्रकाशात्मा ७६ प्रतापनः ७७।८३ ऋद्धः ७८ स्पष्टाक्षरो ७९ मंत्रः ८० चंद्रांशुः ८१ भास्करद्युतिः ८२।८४।
टीका ओजस्तेजो द्युतिधरः

स्वपत्रा ओजस्तेज इति नामद्वयं बलं बलवत्त्वं ... ओजस्तेज इति नामद्वयमित्यपरे वदंति
द्युतिधरः ७५ प्रकाशस्वरूपः आत्मा यस्य स प्रकाशात्मा प्रकाशात्मकं परतरं ७६ ज्ञानलक्षणां दीप्तिं धारयतीति
प्रपतीति प्रतापनः ७७ धर्मज्ञानवैराग्यैश्वर्यादिभिरुपेतत्वादृद्धः ७८ स्पष्टमुदात्तमोंकारलक्षणमक्षरमस्येति स्प
ष्टाक्षरः ७९।। ऋग्यजुः साम लक्षणो मंत्रः मंत्रबोध्यत्वाद्वा मंत्रः ८० संसारदुःखतिग्मांशुतापतापितचेतसां।।
तापत्रयार्कसंतप्तानां वा चंद्रांशुरिवाह्लादकरत्वाच्चंद्रांशुः ८१ भास्करस्य द्युतिसाधर्म्याद्भास्करद्युतिः ८२।८४
श्लोकः अमृतांशूद्भवो ८३ भानुः ८४ शशबिंदुः ८५ सुरेश्वरः ८६। औषधं जगतः सेतुः ८७ सत्यधर्मपराक्रमः ८८।८५।।
टीका अमृतांशुश्चंद्रो मथ्यमाने पयोनिधौ मथ्यमानेन तस्योद्भवो यस्मात् सो अमृतांशूद्भवः ८३ भातीति भानुः
तमेव भांतमनुभाति सर्वमित्यादिश्रुतेः यदादित्यगतं तेजो जगद्भासयतेऽखिलमिति स्मृतेश्च ८४।। शशवत्
बिंदुर्लांछनं यस्येति शशबिंदुश्चंद्रः तद्वत्प्रजाः पुष्णातीति शशबिंदुः पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मक इ
ति भगवतोक्तं ८५ सुराणां देवानां शोभनदातॄणां चेश्वरः सुरेश्वरः संसाररोगभेषजत्वादौषधं जगतां समुत्ता
रणहेतुत्वात् सेतुः वर्णाश्रमादीनामिति जगतः सेतुः एष भूताधिपतिरेष लोकेश्वर एष लोक
पालकः स एष सेतुर्विधारण एषां लोकानामसंभेदायेति श्रुतेः ८७ सत्या अवितथा धर्मा ज्ञानादयो गुणाः
पराक्रमाश्च यस्य सः सत्यधर्मपराक्रमः ८८।८५। श्लोकः भूतभव्यभवन्नाथः ८९ पवनः ९० पावनो ९१ नलः।
९२ कामहा ९३ कामकृत् ९४ कांतः ९५ कामः ९६ कामप्रदः प्रभुः ९७।८६ टीका भूतभव्यभवतां भूतग्रामाणां नाथः

स्तेयोग्यते तानुच्छनयति तेभ्य आशास्ते तेषामीश इति वा भूतभव्यभवन्नाथः ५० पवन इति पवनत्वात्पवनः।
पवनः पवतामस्मीति भगवद्वचनात् ५१ पावयतीति पावनः भीषास्माद्वातः पवत इति श्रुतेः ५२ अना
न्नाणेन लभ्यते आलम्बनेन स्वीकरोतीति जीवो नलः अनात् लातीत्यनलः नलतिर्गंधवाचिनो नञ्पूर्वा
दानलः अगंधमरसमित्यादिश्रुतेः अलं पर्याप्तमस्य न विद्यत इति वा नलः अनल इत्यनेन नलो कोवा
नलः ५३ कामान् हंति मुमुक्षूणां भक्तानां हिंसकानां वेति कामहा ५४। सात्विकानां कामिनां कामाक
रोतीति कामकृत् कामः प्रद्युम्नः तं जनकत्वाद्वा कामकृत् ५५ अभिरूपतमः कांतः ५६ काम्यतेसौ
ताद्विपुरुषार्थचतुष्टयमिति कांक्षिभिरिति कामः ५७ भक्तेभ्यः कामानुत्कर्षेण ददातीति कामप्रदः ५८। प्रकर्षे
णभवनात्प्रभुः ५९ श्लोकः युगादिकृत् २०० युगावर्तो २०१ नैकमायो २०२ महाशनः २०३ अद्भुतो २०४ व्यक्तरू
पश्च २०५ सहस्रजित् २०६ अनंतजित् २०७॥४६॥ टीका। युगादेः कालभेदस्य कर्तृत्वाद्युगादिकृत् युगानामारंभ
कत्वादिति युगादिकृत् २०० इति नाम्नां तृतीयशतकं विवृतं २०० संधाता धामन्यायः संप्रवर्तनः सकर्ता युवि: कालात्मा
कल्पादिति युगादिकृत् २०० इति नाम्नां तृतीयशतकं विवृतं युगानि कृतादीन्यावर्तयतीति यतः कालात्मा
वह्निः नैकरूपः चंद्रांशुः पवन इति दशकानां मायानि युगानि कृतादीन्यावर्तयतीति नैकमाया नलो योनज इति सूत्रेन
तस्मा तस्माद्युगावर्तः १ एका माया न विद्यते बह्वीर्मायाः वहतीति नैकमाया वाचिनो विद्या मायावनात् २ महद
... वधरहितस्यापि नकारस्य पृथि ...

शानमस्येति महाशनः कल्पांते सर्वग्रसनत्वात् ३ सर्वैर्बुद्धींद्रियाणामशक्यत्वादद्भुतः ४ स्थूलरूपेण व्यक्तं रू
पमस्येति व्यक्तरूपः स्वयंप्रकाशत्वाद्योगिनां व्यक्तं रूपमस्येति वा ५ सहस्राण्यसुराणां जयतीति सहस्रजित्
६ सर्वाणि भूतानि युद्धक्रीडनादिषु सर्वत्राचिंत्यशक्त्या जयत्यनंतजित् ७॥४६॥ श्लोकः इष्टः ८ विशिष्टः ९
शिष्टेष्टः १० शिखंडी ११ नहुषो १२ वृषः १३ क्रोधहा १४ क्रोधकृत् १५ कर्ता १६ विश्वबाहु १७ महीधरः १८॥४७॥
टीका परमानंदात्मकत्वेन प्रियः इष्टः यज्ञैः पूजितत्वाद्वेष्टः ८ सर्वेषामंतर्यामित्वेन विशिष्टत्वाद्विशिष्टः
९ शिष्टानां विदुषां मिष्टः शिष्टेष्टः शिष्टाः इष्टा अस्येति वा शिष्टेष्टः प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम
प्रिय इति भगवद्वचनात् शिष्टैः योगिभिरिष्टः पूजित इति वा शिष्टेष्टः १० शिखंडः कलापो अलंकरणमस्येति
शिखंडी गोपवेषधरः ११ यतो नह्यति भूतानि मायया ततो नहुषः नहबंधन इति धातुः १२ कामानां वर्ष
णात् वृषो धर्मः वृषो हि भगवान्धर्मः स्मृतो लोकेषु भारत नैघंटुकपदाख्याने विद्धि मां वृषमित्युत इति म
हाभारते १३ साधूनां क्रोधं हंतीति क्रोधहा १४ असाधूनां असाधुषु क्रोधं करोतीति क्रोधकृत् १५ क्रिय
त इति कर्म जगत्तस्य कर्ता यद्वा एतेषां पुरुषाणां सकर्ता यस्य वै तत्कर्म स वै वेदितव्य इति श्रुतेः क्रोधकर्ता
दैत्यादीनां कर्तृभेदकर इत्येकं वा नाम १६ विश्वेषामालंबनत्वेन विश्वे बाहवोऽस्येति विश्वबाहुः विश्वतो
बाहवोऽस्येति वा विश्वबाहुः विश्वतो बाहुरिति श्रुतेः १७ महीं महतीं पूजां धरणीं वा धत्त इति महीधरः १८॥४७॥
श्लोकः अच्युत १९ प्रथितः २० प्राणः २१ प्राणदो २२ वासवानुजः २३ अपांनिधिः २४ अधिष्ठान २५ मप्र
मत्तः २६ प्रतिष्ठितः २७। टीका। जायतेऽस्ति वर्धते परिणमते अपक्षीयते नश्यतीति षड्भावविकाररहि

तत्वादच्युतः शाश्वतं शिवमच्युतमिति श्रुतेः १९ जगदुत्पत्त्यादिकर्मभिः प्रख्यातः प्रथित उच्यते २० सूत्रात्म
नाप्रजः प्राणयतीति प्राणः प्राणो वा अहमस्मीति वा ऋचाः वायुर्वै गौतम सूत्रमिति श्रुतेः वायुरूपेण सर्पः
२१ सुराणामसुराणां च यस्मात्सर्वं प्राणबलं ददातीति द्यति वेति प्राणदः २२ अदितिर्लोकस्य पादास
वस्यानुजो जात इति वा सवानुजः २३ आपो यत्र निधीयंते सोऽपांनिधिः सरसामस्मि सागर इति भगवद्
चनात् २४ अधितिष्ठंति भूतानि उपादानकारत्वेन ब्रह्मेत्यधिष्ठानं मत्स्थानि सर्वभूतानीति भग
वद्वचनात् २५ अधिकारिभ्यः कर्मानुरूपफलं पुरुषार्थं न प्रमाद्यतीत्यप्रमत्तः २६ स्वे महिम्नीति श्रु
तेः २७ श्लोकः स्कंदः २८ स्कंदधरः २९। धुर्यो ३० वरदो ३१ वायुवाहनः ३२ वासुदेवो ३३ बृहद्भानु
३४ रादिदेवः ३५ पुरंदरः ३६ ।४८ टीका। स्कंदत्यमृतरूपेण गच्छतीति स्रवति वायुरूपेण शोषयतीति वा
स्कंदः २७ स्कंदं धर्मपथं धारयतीति स्कंदधरः २८ धरं वहतीति समस्तभूतजन्मादिलक्षणमिति धुर्यः २९
अभिमतान् वरान् ददातीति वरदः वरं गोदक्षिणां ददाति यजमानरूपेणेति वा वरदः गौर्वै वर इति श्रु
तेः ३० प्रवहादीन् सप्त वायून् वाहयतीति वायुवाहनः वहादिना समस्तयात् द्योतते स्तूय
तेः ३१ वहतीति वायुः वायून् वहतः सप्त वायून् दीव्यति क्रीडति विजिगीषते व्यवहरति द्योतते स्तूयते स
३२ वसति वा नसयत्याच्छादयतीति वासुः दीव्यतीति वासुदेवः छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः स
तेकामते गच्छतीति देवः वासुश्चासौ देवश्चेति वासुदेवः सर्वभूतानां वासुत्वाद्देवयोनितः वासुदेवस्ततो ज्ञेयो
[illegible] वासुदेवस्ततः स्मृतः वसनात्सर्वभूतानां वासुत्वाद्देव [illegible] २९

योगिभिस्तिल वदर्शिभिरित्ययोगपर्वणि सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततः स वासुदेवेति विद्वद्भिः
परितः इति वासुदेवः वासुश्चासौ देवश्चेति सर्वाणि तत्र भूतानि वसंति परमात्मनि भूतेषु सच सर्वात्मा वासु
देवस्ततः स्मृतः इति श्रीविष्णुपुराणे ३३ बृहंतो भानवो यस्य चंद्रसूर्यादिगामिनः विश्वं जगद्भासयंति स
बृहद्भानुरुच्यते ३४ आदिकारणं स चासौ देवश्चेत्यादिदेवः द्योतनादिगुणवान् वा आदिदेवः ३५
सुरशत्रूणां पुराणां दारणात्स पुरंदरः वाचंयम पुरंदरा वितिभगवत्वाणि निति पातिनात् ३६ ४९
श्लोकः अशोकः ३७ तारणः ३८ तारः ३९ शूरः शौरिर्जनेश्वरः ४२ अनुकूलः ४३ शतावर्तः ४४
पद्मी ४५ पद्मनिभेक्षणः ४६ ।५० टीका शोकादिषड्ऊर्मिवर्जितो अशोकः बुभुक्षा च पिपासा च शोकमोहौ मृ
जरा मृत्यू इति षड्ऊर्मयः ३७ संसारसागरात्तारयतीति तारः ३९ गर्भजन्मजरामृत्युभयात्तारयतीति तारः ४० शूरस्याप
त्यं शौरिः वासुदेवस्वरूपः शौरिः शूरकुलोद्भवत्वाद्वा शौरिः ४१ जनानां जंतूनामीश्वरो जनेश्वरः ४२ आत्मत्वे
नहि सर्वेषां मनुरूपो अनुकूलः न हि स्वस्मिन्प्रातिकूल्यं स्वयमाचरति ४३ धर्मत्राणाय शतमावर्तनानि प्रा
दुर्भावा अस्येति शतावर्तः नाडीशतेन प्राणरूपेण वर्तत इति वा शतावर्तः ४४ पद्मं हस्ते अस्य विद्यत इति
पद्मी ४५ पद्मनिभे ईक्षणे दृशावस्येति पद्मनिभेक्षणः ४६ ५० श्लोकः पद्मनाभो ४७ रविंदाक्षः ४८ पद्म
गर्भः ४९ शरीरभृत् ५० महर्द्धिः ५१ ऋद्धो ५२ वृद्धात्मा ५३ महाक्षो ५४ गरुडध्वजः ५५।५१ टीका पद्मनाभो
कर्णिकायां मध्ये स्थित इति पद्मनाभः ४७ अरविंदोपमाक्षत्वादरविंदाक्षः ४८ पद्मस्य हृदयाख्यस्य मध्य

58

उपास्यत्वाद्यज्ञगर्भः ४९ योजयन् पंचभूतरूपेणान्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयन् शरीरम्
तस्य मायया शरीराणि विभर्त्तीति वा शरीरभृत् ५० महती ऋद्धिर्भूतिरस्यास्तीति महर्द्धिः प्रपंचरूपेण वर्द्धमान
त्वादृद्धः ५२ प्रणवरूपेण वा वृद्धः पुरातनत्वादात्मास्येति वृद्धात्मा ५३ महती अक्षिणी महांतश्चाक्षाणि वा
स्येति महाक्षः ५४ गरुडांको ध्वजो यस्येति गरुडध्वजः ५५ ५१ श्लोकः अतुलः ५६ शरभो ५७ भीमः ५८।
समयज्ञो ५९ हविर्हविः ६० सर्वलक्षणलक्षण्यो ६१ लक्ष्मीवान् ६२ समितिंजयः ६३ ५२ टीका। तुलानु
पमानमस्य न विद्यत इत्यतुलः न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः इति श्रुतेः अतः समोऽस्य अधिकः
कुतोऽन्य इति स्मृतेश्च ५६ शरः शरीराणि शीर्यमाणत्वात्तेषु प्रत्यगात्मतया भातीति शरभः ५७ बिभेत्यस्मात्स
र्वमिति भीमः भीमादयो पादानः इति पाणिनिस्मरणात् पंचमीसमासः ततः सन्मार्गे परिवर्तिनां अद्वितीयं दही
तीति भीमो वा ५८। सर्वस्मिंस्तत्तत्कालेकर्म विशेषविदि घटनमयाद्य जानातीति वा समयज्ञः सर्वभूते
षु सममिदं यजनमस्येति वा समयज्ञः सर्वसत्वसाम्यमच्युतस्येति प्रह्लादवचनं ५९ यज्ञेषु हविर्भागं हर
तीति हविर्हविः अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात् स्मृतिमात्रेण पुंसां पापं
हविः आवध्नं पुरश्चं पश्चिमिति हविर्विष्णुरुच्यते पयाद्गविरिति भगवद्वचनात् हरिद्वर्णत्वाद्धरिः हन्त
हरतीति हरिः सहेतुकं संसारं हरतीति वा हरिः हविर्भागं क्रतुषु हरतीति वा हरिः हरिर्हरति पापानि ६०
 २८

59

सर्वैर्लक्षणैः प्रमाणैर्लक्षणं दर्शनं ज्ञानं जायते यत्तद्विनिर्दिष्टं सर्वलक्षणं तत्र साधुः सर्वलक्षणलक्षण्यः त
स्यैव परमार्थत्वाल्लक्षणसामग्रीवत्तवेदांते ६१ उरसि नित्यं शालक्ष्मीयस्य वक्षसि हृदये नित्यं वस
तीति लक्ष्मीवान् ६२ समितिं युद्धं जयतीति समितिंजयः ६३ ५२ श्लोकः विक्षरो ६४ रोहितो ६५ मार्गो ६६॥
हेतु ६७ र्दामोदरः ६८ सहः ६९ महीधरो ७० महाभागो ७१ वेगवान् ७२ मिताशनः ७३ ५३। टीका। विगतः
क्षरो विनाशोऽस्यासौ विक्षरः ६४ स्वच्छंदतया रोहितां मूर्तिं मत्स्यविशेषमूर्तिं वा वहतीति रोहितः ६५।
मुमुक्षवो वेदवंतस्तं देवं मार्गयंतीति मार्गः परमानंदो येन प्राप्यते स वा मार्ग इति उच्यते ६६ उपा
दानं निमित्तं च कारणं स एवेति हेतुरुच्यते ६७॥ दमादि साधनेनोदारा उत्कृष्टा गतिर्या तया गम्यत इति
दामोदरः दमाद्दामोदरं विदुरिति महाभारते॥ यशोदया दाम्नोदरे बद्ध इति वा दामोदरः तयोर्मध्ये
गतं बद्धं दाम्ना गाढं तयोदरे ततश्च दामोदरतां स ययौ दामबंधनादिति ब्रह्मपुराणे दामानि लोक
नामानि संति तानि यस्योदरांतरे तेन दामोदरो देवः श्रीधरः श्रीसमाश्रितः इति वामवचनाद्दामोदरः
६८ सर्वानभिभवति सहते क्षमत इति वा सहः ६९ महीं गिरिरूपेण धत्त इति महीधरः वनानि विष्णु गि
रयो दिशश्चेति पराशरोक्तेः ७० महान् भागो भाग्यमस्यावतारेष्वस्तीति महाभागः स्वेच्छया धारयन्देहं
प्रयच्छति भागधेयं भोजनानि भुंक्ते इति वा महाभागः ७१ वेगो जवस्तद्वान् वेगवान् अनेजदेकं मनसो

जवीयइतिश्रुतेः ७२ संहारसमये विश्वमश्नातीति मिताशनः ७३ ५२ श्लोकः उद्भवः ७४ क्षोभणो ७५ देवः
७६ श्रीगर्भः ७७ परमेश्वरः ७८ करणं ७९ कारणं ८० कर्ता ८१ विकर्ता ८२ गहनो गुहः ८४ ५३॥ टी
का उत्पत्तिर्वोद्भवोपादनकारणत्वादुद्भवः उद्भूतो भवात्संसारादिति उद्भवः ७४ सर्गकाले च प्रकृतिं च
पुरुषं च प्रविश्य विश्वात्मा इच्छया हरिः क्षोभयामासेति क्षोभणः प्रकृतिं पुरुषं चैव प्रविश्या
त्मेच्छया हरिः क्षोभयामास भगवान्सर्गकाले व्ययाव्ययाविति विष्णुपुराणे ७५ दीव्यति क्रीडति
सर्गादिभिर्विजिगीषते व्यवहरति सर्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः कामयति स
र्वत्र गच्छतीति तस्माद्देवः एको देव इति मन्त्रवर्णात् ७६ श्रीर्विभूतिर्यस्योदरान्तरे जगद्रूपा स्थिता स श्री
गर्भः ७७ परमश्चासावीश्वरश्चेति परमेश्वरः ईशनशील इत्यर्थः समं सर्वेषु भूतेषु तिष्ठन्तं पर
मेश्वरमिति भगवद्वचनात् ७८ साधकतमं करणं ७९ जगदुत्पत्तौ साधकतमं कारणमुपादानं नि
मित्तं च ८० कर्ता स्वतन्त्रः ८१ विचित्रं भुवनं कृतवानिति विकर्ता ८२ स्वतत्त्वं सामर्थ्यं चेष्टितं वा तस्य
ज्ञातुं न शक्यत इति गहनः ८३ गूहते संवृणोति स्वरूपादीन मायायेति गुहः नाहं प्रकाशः सर्वस्य
योगमायासमावृत इति भगवद्वचनात् ८४ ५४ श्लोकः व्यवसायो ८५ व्यवस्थानः ८६ संस्थानः ८७ २५

स्थानदो ८८ ध्रुवः ८९ परर्द्धिः ९० परमस्पष्टः ९१ तुष्टः ९२ पुष्टः ९३ शुभेक्षणः ९४ ५५ टीका सविन्मात्र
स्वरूपत्वाद्व्यवसायः ८५ यस्मिन्व्यवस्थितिः सर्वः स व्यवस्थानः लोकपालाद्यधिकार जरायुजाण्डजा
स्वेदजोद्भिज्जब्राह्मणक्षत्रियवैश्यशूद्रान् चातुर्वर्ण्यात्तद्ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासलक्षण
ज्ञातिवर्णाश्रमतद्धर्मादिकान विभज्य करोतीति वा व्यवस्थानः ८६ कृत्यल्युटो बहुलमिति बहुल
मिति बहुलमिति बहुलग्रहणात्कर्तरि ल्युट्प्रत्ययः अत्र भूतानां संस्थितिः प्रलयात्मिका समीची
नं स्थानमस्येति वा संस्थानः ८७ ध्रुवादीनां कर्मानुरूपं स्थानं ददातीति स्थानदः ८८ अविनाशित्वाद्ध्रु
वः ८९ परा परमा ऋद्धिर्विभूतिरस्येति परर्द्धिः ९० अनन्याधीनसिद्धत्वात्संविदात्मकत्वात्परमस्पष्टः
९१ परमानन्दैकरूपत्वात्तुष्टः ९२ सर्वदा संपूर्णत्वात्पुष्टः ९३ शुभं दर्शनं यस्य शुभं शुभंकरं वा ईक्षणं
मुमुक्षूणां मोक्षदं भोगकामिनां भोगप्रदं सर्वसंदेहविच्छेदकारणं पावनं हृदयग्रन्थीनां विच्छेदकरं सर्व
कर्मणां क्षपणमविद्यायाश्च निवर्तकं समस्येक्षणः भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य
कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेः ९४ ५५ श्लोकः रामो ९५ विरामो ९६ विरजो ९७ मार्गो ९८ नेयो ९९
नयोऽनयः १०० वीरः १०१ शक्तिमतां श्रेष्ठो १०२ धर्मो १०३ धर्मवि १०४ दुत्तमः १०५ ५६ टीका नित्यानं
दलक्षणोऽस्मिन्योगिनो रमन्त इति रामः रमन्ते योगिनोऽनन्ते नित्यानंदे चिदात्मनि इति रामपदेना

62

सोपरं ब्रह्माभिधीयते इति पद्मपुराणे। स्वेच्छया रमणीयं वपुर्वहन्वा दाशरथी रामः ८५ विरा
मोऽवसानं प्राणिनां यस्मिन्निति विरामः ८६ विगतं रजोऽस्य विषयसेवायामिति विरजः ८७। यं विदि
त्वामृतत्वाय कल्पंते मुमुक्षवः स एव पंथा मार्गः नान्यः पंथा विद्यते यनायेति श्रुतेः ८८। मार्गेणास
म्यक्ज्ञानेन जीवः परमात्मतया नीयते इति नेयः ८९ नयतीति नयो नेता तेन मार्गेण नेयो नयो नय
इति त्रिरूपं कथ्यते नास्यो नयो नेता विद्यत इत्यनयः ९१ इति नाम्नां चतुर्थं शतं विवृतं युगवर्तैः
श्रीखंडी प्राणदः वायुवाहनः जनेश्वरः मुद्रः लक्ष्मीवान् भगवान् विकर्ता तु एः इति ह शंकादि नामानि
१० विक्रमशालित्वाद्वीरः १ शक्तिमतां विरिंच्यादीनामपि शक्तिमत्वाच्छ्रेष्ठः २ सर्वभूतानां धारणात्वा
द्धर्मः अणुरेषु धर्मः इति श्रुतेः धर्मैराराध्यत इति वा धर्मः ३ श्रुतयः स्मृतयश्च यस्माज्ज्ञाभूताः स एव सर्व
धर्मवित् ४ तेषामुत्तमः इति धर्मविदुत्तमः ५ ५६ श्लोकः वैकुंठः ६ पुरुषः ७ प्राणः ८ प्राणदः ९ प्रणवः प्र
थुः १० हिरण्यगर्भः ११ शत्रुघ्नो १२ व्याप्तो १३ वायु १४ रधोक्षजः १५ ५७ टीका विविधा कुंठा गतेः प्रतिह
तिः विकुंठा तस्या विकुंठायाः कर्तेति वैकुंठः जगदारंभे विश्लिष्टानि भूतानि परस्परं संश्लेषयन्नेषां
गतिं प्रतिबध्नीयादिति वा मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना वायुश्च तेजसा सार्द्धं वैकुंठत्वं ततो

३० ३०

63

ममेति शांतिपर्वणि ६ सर्वस्मात्पुरा सदनात्सर्वपापस्य सादनाद्वा पुरुषः स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्
पाप्मन औषत्तस्मात्पुरुष इति श्रुतेः पुरि शयनाद्वा पुरुषः स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रु
तेः ७ प्राणितीति क्षेत्रज्ञरूपेण प्राणात्मना चेष्टयन्वा प्राणः ८ चेष्टां करोति श्वसनस्थ— वीति विष्णुपुराणे
खंडयन्प्राणिनां प्राणान्प्रलयादिष्विति प्राणदः ९ प्रणौतीति प्रणमति चेति प्रणवः तस्मादोमिति प्रण
वीति श्रुतेः प्रणमंत इति वा प्रणवः प्रणमंतीह यं वेदास्तस्मात्प्रणव उच्यते इति सनत्कुमारवचनात्
१० प्रपंचरूपेण विस्ततत्वात्पृथुः ११ हिरण्यगर्भः संभूतिकारणं हिरण्मयमंडं यद्वीर्यसंभूतं तदस्य
गर्भ इति हिरण्यगर्भः १२ त्रिदशानां शत्रून्हंतीति शत्रुघ्नः १३ कारणत्वेन सर्वकार्याणां व्यापनाद्व्याप्तः
वाति गंधं करोतीति वायुः पुण्यो गंधः पृथिव्यां चेति भगवद्वचनात् १५ अधो न क्षीयते जातु यस्माद
धोक्षजः तस्मादधोक्षजो नाम्ना मुनिभिः परिगीयते इत्युद्योगपर्वणि द्यौरंतरिक्षं पृथ्वी वाक्षं योर्ध्वं
स्मादजायते तयोर्मध्ये वैराजरूपेणेति वाऽधोक्षजः १६ ५७। श्लोकः ऋतुः १७। सुदर्शनः १८ कालः।
१९ परमेष्ठी २० परिग्रहः २१ उग्रः संवत्सरो २३ दक्षो २४ विश्रामो २५ विश्वदक्षिणः २६। ५८। टीका
कालात्मना ऋतुशब्देन लक्ष्यते इति ऋतुः ऋतुरूपेण लक्ष्यत इति श्रुतेः १७ शोभनं निर्वाणलक्ष
णं फलं दर्शनं ज्ञानमस्येति सुदर्शनः शुभे ईक्षणे पद्मपत्रायते ऽस्येति वा स्वेच्छया सुंदरं देहं वहती

64

तिसुदर्शनः। सुखेन दृश्यते भक्तैरिति वा सुदर्शनः॥१९८॥ कलयति सर्वमिति कालः कालः कलयता
मस्मीति भगवद्वचनात्॥१९९॥ परमे पृष्ठे स्वे महिम्नि हृदयाकाशे वा स्थातुं शीलमस्येति। परमे
ष्ठी विराजत इति श्रुतेः यएषो हृदयाकाशे इति मंत्रवर्णात्॥२०॥ शरणार्थिभिः परिवृतो गृह्यते सर्व
गतत्वात्परितो ज्ञायत इति वा परिग्रहः। पत्रपुष्पादिकं भक्तैरर्पितं परिगृह्णातीति वा परिग्रहः
२१ सूर्यादीनामपि भयहेतुत्वादुग्रः भीषास्माद्वातः पवते भीषोदेति सूर्य इति श्रुतेः २२ संवसंति
भूतानि यस्मिन्निति संवत्सरः २३ जगद्रूपेण वर्द्धमानत्वात्सर्वकर्माणीति प्रकरोतीति वा दक्षः २४
संसारसागरे स्तुत्यपाठादिभिः षड्भिर्नितरां गीतैरविद्यादोषैर्महाक्लेशैर्निद्रादिभिरूपनैः शे
षवशीकृतानां विश्रांतिकांक्षमाणानां विश्रामं मोक्षं करोतीति विश्रामः २५ विश्वतस्माद्दक्षि
णः शक्तो विश्वेषु कर्मसु दाक्षिण्याद्वा विश्वदक्षिणः २६॥५८॥ श्लोकः विस्तारः २७ स्थावरः स्थाणुः
२८ प्रमाणं २९ बीजमव्ययं ३० अर्थोऽनर्थो ३१ महाकोशो ३३ महाभोगो ३४ महाधनः ३५॥५९॥
टीका। विस्तीर्यंते समस्तानि जगंति यस्मिन्निति विस्तारः २७ स्थितिशीलत्वात्स्थावरः स्थितिशी
लानि पृथिव्यादीनि तिष्ठंति तस्मिन्निति स्थाणुः स्थावरश्चासौ स्थाणुश्चेति स्थावरः स्थाणुः
२८ संविदात्मना प्राणी प्रत्यक्षादि प्रमाणं वा २९ अन्यथाभावव्यतिरेकेण कारणमिति बीजमव्ययं।

३१ १२० ३१

65

सुखरूपत्वात्सर्वैरर्थ्यत इति अर्थः ३१ न विद्यते र्थप्रयोजनमाप्तकामत्वादस्येति अनार्थः ३२ महा
कोशोऽस्य महांतः कोशा अन्नमयमनोमयप्राणमयविज्ञानमयानंदमयः पंचकोशाच्छादका अस्ये
ति महाकोशः ३३ महान्भोगः सुखस्वरूपमस्येति महाभोगः ३४ महद्योगसाधनलक्षणं
धर्मधनमस्येति महाधनः ३५॥५९॥ श्लोकः अनिर्विण्णः ३६ स्थविष्ठो ३७ भूः ३८ धर्मयूपो ३९ म
हामखः ४० नक्षत्रनेमिः ४१ नक्षत्री ४२ क्षमः ४४ समीहनः ४५॥६०॥ टीका। अवाप्तसर्वकामत्वान्नि
र्वेदोऽस्य न विद्यत इत्यनिर्विण्णः ३६ वैराज्यरूपेण स्थितः स्थविष्ठः अग्निर्मूर्द्धा चक्षुषी चंद्रसूर्याविति श्रुतेः ३७
अजन्मा अभूः अथवा भूः सत्तायां नित्यस्य पादादित्वाद्भवतेः क्विप् भवतीति वा भूरुच्यते ३८ यूपे पशुवत्तस्य
माराधनात्मका धर्मास्तत्र बध्यंते इति धर्मयूपः ३९ यस्मिन्नर्पिता मखा यज्ञा निर्वाणलक्षणं फलं
प्रयच्छंतो महांतो यस्माज्जायंते स महामखः ४० नक्षत्रैस्तारकैः सार्द्धं चंद्रसूर्यादयो ग्रहाः वायुपाशमयैर्बंधै
र्निबद्धा ध्रुवसंज्ञिते स ज्योतिश्चक्रं भ्रामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे व्यवस्थितो ध्रुवः।
तस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत्परिवर्तमानस्य हृदये स्थितो विष्णुरिति कल्पतो नक्षत्रनेमिः
शिशुमारस्य वर्णने विष्णुर्हृदयमिति श्रुतेः ४१ स्वाध्याय ब्राह्मणे चंद्ररूपेण नक्षत्रीत्यनेन नक्षत्राणामहं शशीति
भगवद्वचनात् ४२ सर्वेषु कार्येषु समर्थः क्षमः क्षमत इति वा क्षमः क्षमया पृथिवीसमः इति वाल्मीकिवचनात्
४३। सर्वविकारेषु क्षपितेषु स्वात्मनावस्थित इति क्षामः। ज्ञायो मे इति निर्दिष्टं यंतकारस्य मकारादेशः ४४

66

स्याद्यघर्यमम्यगीहतं इतिसमीहनः ४५ ६० यज्ञ ४६ इज्यो ४७ महेज्यश्च ४८ क्रतो ४९ सत्रं ५० सतां गतिः ५१।
सर्वदर्शी ५२ विमुक्तात्मा ५३ सर्वज्ञो ५४ ज्ञानमुत्तमं ५५ ६१ टीका। सर्वयज्ञस्वरूपस्त्वाद्यज्ञः यज्ञो वै विष्णुरि
तिश्रुतेः ४६ यष्टव्योप्ययमेवेति क्रतुफलदातृत्वादिज्यः ये यजंति मखैर्पुण्यैर्देवतादीनिपितॄनपि आत्मा
नमात्मनानित्यं विष्णुमेव यजंतितं इति हरिवंशे ४७ सर्वासु देवतासु यष्टव्यासु प्रकर्षेणायमेव यष्टव्यः
मोक्षफलदातृत्वादिति महेज्यः ४८ यूपसहितो यज्ञः क्रतुः ४९ आसनोप्यपि चोदनालक्षणः सत्रं सतस्त्राय
तइति वा सत्रं ५० सतां मुमुक्षूणां नान्या गतिरिति सतां गतिः ५१ सर्वेषां प्राणिनां कृताकृतं सर्वं पश्यतिस्वाभाविके
न बोधेनेति सर्वदर्शी ५२ स्वाभावेन विमुक्तात्मा यस्येति विमुक्तात्मा विमुक्तश्च विमुच्यतइति श्रुतेः ५४ ज्ञा
नमुत्तममिति स्वेतत्स्य विशेषणमेकं नाम ज्ञानं प्रकृष्टमजन्यमनवच्छिन्नं सर्वस्य साधकतममिति ज्ञानमुत्तमं
ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः ५५ ६१॥ श्लोक सुव्रतः ५६ सुमुखः ५७ सूक्ष्मः ५८ सुघोषः ५९ सुखदः ६० सु
हृत् ६१ मनोहरो ६२ जितक्रोधो ६३ वीरबाहु ६४ विदारणः ६५ ६१ टीका शोभनं व्रतमस्येति सुव्रतः सकृदेव प्र
पन्नाय तवास्मीति च याचते अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेति श्रीरामायणे श्रीरामवचनं ५६ सुम
गं मुखमस्य सहेति सुमुखः प्रसन्नं वदनं यत्प्रपन्नाय तेन प्रणमितीति विष्णुपुराणे वनवासेनु सुमुख
त्वं जेदाशरथी रामः सुमुखः स्वपितृवचनं श्रीमानभिषेकात्परं प्रियं मनसा पूर्वमासद्य वनवासं प्रति
गृहीतवान् इमानि तु महारण्ये विहृत्य नव पंच च वर्षाणि परमप्रीतिः स्थास्यामि वचने तव ॥

32

32

67

मवनं गंतुकामस्य राजत्रश्च वसेथ रामस्य सर्वलोकाभिरामस्य हि मनो रामस्य विव्यथ इति श्रीरामायणे प्रहारते च
सर्वविद्योपदेशेन वा सुमुखः यो ब्रह्माणं विदधाति यो वै वेदांश्च प्रहिणोति पूर्वं तमादित्यादि श्रुतेः ५७। शब्दा
दिस्थूलकारणरहितत्वात् सूक्ष्मः शब्दादयो ह्याकाशवाय्वादीनामुत्तरोत्तरं स्थूलकारणानि तदभावात्सू
क्ष्म उच्यते सर्वगतं सूक्ष्ममिति श्रुतेः ५८ घोषमनोघोषः विद्यात्मको यस्य स मेघगंभीरनिर्घोषत्वाद्वा सुघो
षः ५९ सद्वृत्तानां सुखं ददातीति असद्वृत्तानां सुखं खंडयतीति वा सुखदः ६० प्रत्युपकारनिरपेक्षतयोपकारि
त्वात् सुहृत् ६१ निरतिशयानंदरूपत्वान्मनो हरतीति मनोहरः यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः ६२ क्रो
धो येन जितः स जितक्रोधः वेदमर्यादां स्थापयन्नसुरादीन्हंतीति न तु क्रोधवशादिति जितक्रोधः ६३ असुरवृंद
शाशनूज निघ्नन्वेदमर्यादां स्थापयन् विक्रमशाली बाहुरस्येति वीरबाहुः ६४ अधार्मिकान्विदारयतीति विदार
णः ६५ ६२ श्लोकः स्वापनः ६६ स्ववशो ६७ व्यापी ६८ नैकात्मा ६९ नैककर्मकृत् ७० वत्सरो ७१ वत्सलो ७२ वत्सी ७३।
रत्नगर्भो ७४ धनेश्वरः ७५ ६२ टीका। प्राणिनः स्वापयन्नात्मसंबोधविधुरत्मायया कुर्वन्निवा स्वापनः ६६ स्वातंत्र्यः
स्ववशो जगदुत्पत्तिस्थितिलयकारणत्वात् ६७ सदाकाशवत्सर्वगतत्वाद्व्यापी आकाशवत्सर्वगतश्च नित्य इति
श्रुतेः अथवा कारणत्वेन सर्वकार्याणां व्यापनाद्व्यापी ६८ जगदुत्पत्त्यादिनिमित्तभूता विविधा भूतिनिरने
कधा तिष्ठन्नैकात्मा ६९ जगदुत्पत्तिसंपत्तिविपत्तिप्रभृतिकर्माणि करोतीति नैककर्मकृत् ७० वसत्यत्राखि
लमिति वत्सरः ७१ भक्तिस्नेहित्वाद्वत्सलः वत्सौ शाम्भ्यं कामवदति लक्षत्वयविधानात् ७२ वत्सानां पाल

कल्पादृत्सी जगत्पितुस्तस्य वत्सभूतां प्रजा इति वा वत्सी ७३ रत्नानि गर्भभूतानि अस्येति समुद्रो रत्नगर्भः ७४ ॥
धनानामीश्वरो धनेश्वरः कुबेरः ७५ ६३ श्लोकः धर्मगुप ७६ धर्मकृत् ७७ धर्मी ७८ सदसत् ८० क्षरमक्षरं ८१ अविज्ञा
ता ८२ सहस्रांशु ८४ विधाता ८५ कृतलक्षणः ८६ ६५ टीका। धर्मान् गोपायति रक्षतीति धर्मगुप् धर्मसंस्था
पनार्थाय संभवामि युगे युगे इति भगवद्वचनात् ७६ धर्माधर्मविहीनोऽपि धर्ममर्यादां पालयन् धर्ममेव करो
तीति धर्मकृत् ७७ धर्माधारयति धर्मीन् धारयतीति वा धर्मी ७८ अवितथं परं ब्रह्म सत् सदेव सोम्येदमग्र
आसीदिति श्रुतेः ७९ अपरं ब्रह्मासत् वाचारम्भणं विकारो नामधेयमिति श्रुतेः ८० सर्वाणि भूतजातानि क्षरं ८१
कूटस्थं कारणमक्षरं क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते हाविमोपकृतविति भगवद्वचनात् ८२।
आत्मनि कृतत्वादि संकल्पविकल्पविज्ञानं कल्पितमिति तदास्य नाविज्ञानतया वकुण्ठितस्वभावो जीवो वि
ज्ञाता तस्माद्विलक्षण इति अविज्ञातात्मा उच्यते कर्तृत्वं विज्ञानेकल्पितमिति ज्ञानादा अविज्ञाता समाप्त गुणि
तस्वभावो विज्ञातानामसत्वादि लक्षण इति विज्ञातात्मा अविज्ञाता इति पाठांतरं ८२ आदित्यादिगतास्तेजो
स्यैवेति अयमेव सहस्रांशुः येन सूर्यस्तपति तेजसेद्ध इति श्रुतेः यदादित्यगतं तेज इति भगवद्वचनात्।
८४। विशेषेण शेषदिग्गजभूधरान् सर्वभूतानां पतीन् वा दधातीति विधाता ८५ नित्यनिष्पन्नचैतन्यल
क्षणस्वरूपत्वात् कृतलक्षणः कृतानि लक्षणानि समस्तानि शास्त्राणि येनेति वा कृतलक्षणः वेदाः शा
स्त्राणि विज्ञानमेतत्सर्वं जनार्दनादित्यनवचने चैव वक्ष्यति सजातीयविजातीयव्यवच्छेदकलक्षणं

सर्वभावानामनेनकृतमितिवा कृतलक्षणः आत्मनः ब्रह्मसि श्रीवत्सलक्षणं चिह्नं येन कृतमिति वा कृतल
क्षणः ८६ ६४ श्लोकः गभस्तिनेमिः ८७ सत्वस्थः ८८ सिंहो ८९ भूतमहेश्वरः ९० आदिदेवो ९१ महादेवो ९२
देवेशो ९३ देवभृद्गुरुः ९४ ६५ टीका गभस्तिचक्रस्य मध्ये सूर्यात्मनास्थित इति गभस्तिनेमिः ८७। सत्व
गुणप्रकाशकं प्रधान्येनायमधितिष्ठति सर्वप्राणिषु तिष्ठतीति वा सत्वस्थः ८८ विक्रमशालित्वात् सिंहवत्
सिंहः नृशब्दलोपेन सत्यभामा सत्या भीमसेनो भीमेति नृसिंहो वा सिंहः ८९ भूतानां महानीश्वरः सर्वेषु
भूतेषु स एव परमो महानीश्वर इति वा भूतमहेश्वरः ९० सर्वभूतान्यादीयते रनेनेत्यादिः आदिश्चासौ देवश्चे
त्यादिदेवः ९१ सर्वान् भावान्परित्यज्यात्मज्ञानेन योगैश्वर्ये महति महीयते तस्मादुच्यते महादेव इति श्रु
तेः महान्देवेति महादेवः ९२ प्रधान्येन देवानामीशो देवेशः ९३ देवान् बिभर्तीति देवभृत् स च शक्रः न पापि
शासितेति देवभृद्गुरुः देवानांभरणोत्सव विद्यानां भरणाद्वा देवभृद्गुरुः ९४ ६५ श्लोकः उत्तरो गोपति ९५ गो
प्ता ९६ ज्ञानगम्यः ९७ पुरातनः ९८ शरीरभूतभृत् ९९ भोक्ता १०० कपीन्द्रो १०१ भूरिदक्षिणः १०२ ६६ टीका जन्म
संसारसागरादुत्तारयतीति उत्तरः सर्वोत्कृष्ट इति वोत्तरः विश्वस्मादिन्द्र उत्तर इति श्रुतेः गवां पालनाद्गो
पवेषधरो गोपतिः गौर्मही तस्याः पतित्वाद्वा गोपतिः समस्तभूतानि पालयन् गोप्ता रक्षको जगत इति
गोप्ता ९६ न कर्मणा न ज्ञानकर्मभ्यां वा गम्यते किंतु ज्ञानेनैव गम्यत इति ज्ञानगम्यः ९७ कालात्मना परि

पिरुत्वात्पुरापि नभवतीति पुरातनः पुराणोप्यनूतनो तिवा पुरातनः ४८ शरीरभूतानां भरणात्प्राणरूपधरः शरीरी
रभूतभृत ४९ पालको भोक्ता स्वस्य निरतिशयानंदसंदोहसंभोगाद्भोक्ता ५० इति श्रीपरमहंसपरिव्राजका
चार्यश्रीशंकरभगवत्पादविरचिते विष्णोर्नामसहस्रभाष्ये पंचशतीविवरणं १ वीरो १ हिरण्यगर्भः २३ गुः २
अनघो ४ नक्षत्री ५ सर्वदर्शी ६ मनोहरो ७ वत्सलो ८ अमृतं ९ महादेवः १० इति दशकादिनामानि कपिर्वै
वेराहश्रेष्ठश्चेति कपींद्रो वराह स्मृतिः वराहं पुरास्थितः इति कपिः इंद्रः कपीनां वानराणां इंद्र इति वा कपींद्रो
राघवः १ भूरयो यज्ञदक्षिणा धर्ममर्यादां दर्शयतो यज्ञं कुर्वतोस्य विद्यंत इति भूरिदक्षिणः २ ६६ श्लोकः
सोमपो ३ अमृतपः ४ सोमः ५ पुरुजित्पुरुसत्तमः ७ विनयो ८ जयः ९ सत्यसंधो १० दाशार्हः ११ सात्वतां पतिः
१२ टीका सोमं पिबति सर्वयज्ञेषु यष्टव्यत्वाद्देवतारूपेणेति सोमपः धर्ममर्यादां दर्शयन् यजमानरूपेणेति
वा सोमपः २ स्वात्मामृतरसं पिबन्नमृतपः मथितममृतमसुरैर्ह्रियमाणं रक्षित्वा देवान्पाययित्वा स्वयं मप्य
पिबदिति वा अमृतपः ४ सोमरूपेणौषधीः पोषयन् सोमः ३ मयात्स्वरूपं वर्ततीति ईश्वरो वा सोमः ५ पुरून्ब
रून् जयतीति पुरुजित् ६ विश्वरूपत्वात्पुरुः उत्कृष्टत्वात्सत्तमः पुरुश्चासौ सत्तमश्चेति पुरुसत्तमः ७ विनय
दंडं दुष्टानां प्रजानां करोतीति विनयः ८ समस्तानि भूतानि जयतीति जयः ९ सत्या संधा संकल्पो स्येति
सत्यसंधः सत्यसंकल्प इति श्रुतेः १० दाशा दानं तदर्हतीति दाशार्हः दाशृ दान इति धातुपाठात् दाशा॰
र्हस्य कुलस्य यदपत्यमिति वा दशार्हः

३४

दाशार्हस्य यादवस्यापत्यमिति वा दाशार्हः ११ नाम तंत्रं करोति तदाचष्ट इति विकृते केचिच्चेति क्विप् प्रत्यये प
रेणेश णिलीनि लिलोपे च कृते पदं सात्वत् तेषां पतिर्योगक्षेमकर इति सात्वतां पतिः १२ ६० श्लोकः जीवो १३
विनयिता साक्षी ॥१४॥ मुकुंदो १५ अमितविक्रमः १६ अंभोनिधिः १७ अनंतात्मा १८ महोदधिशयो १९ अंतकः २०
६५ टीका प्राणान्क्षेत्रज्ञरूपेण धारयन् जीव उच्यते जीवप्राणधारणे १३ विनयितृत्वं विनियमनानां च सा
क्षात्पश्यति प्रजानामिति विनयिता साक्षी अपवा नयते गतिवाचिनो रूपं विनियितानय गतो सर्वत्र
गतिरित्यर्थः असाक्षी असाक्षात्करणात्मातिरिक्तं वस्तु न पश्यतीत्यर्थः १४ मुक्तिं ददातीति
मुकुंदः पृषोदरादित्वात्साधुत्वं अक्षरसाम्यान्निरुक्तिं वचनात्तै निरुक्तिकानां मुकुंद इति निरुक्तिः १५ अ
मिता अपरिच्छिन्ना विक्रमास्त्रयः पादविक्षेपणा यस्येति अमिति विक्रमः अमितो विक्रमः शौर्यमस्येति वा
अमितविक्रमः १६ अंभांसि देवादयो स्मिन्निधीयंत इति अंभोनिधिः तानि ह वा एतानि चत्वार्यंभांसि देवाम
नुष्याः पितरो सुरा इति श्रुतेः सागरे वा अंभोनिधिः सरसामस्मि सागर इति भगवद्वचनात् १७ देशतः का
लतो वस्तुतश्चापरिच्छिन्नस्वरूपत्वादनंतात्मा १८ संहृत्य सर्वभूतान्येकार्णवं जगत्कृत्वाधिशेते महोदधि
मिति महोदधिशयः १९ अंतं करोति सर्वभूतानामित्यंतकः अंतो पपदात्करोतेरप्रत्यये रूपं अथवा तत्करो
तितदाचष्टे इति णिचि कृते एवुल् तृचाविति एवुलि रूपं तस्य युवोरनाकाविति अकादेशे रूपमिति अं॰
तकः इष्यते पाठांतरमिति रूपं २१ ६५

श्लोकः ऋजो २१ महार्हः २२ स्वभावो २३ जितामित्रः २४ प्रमोदनः २५ आनंदो २६ नंदनो नंदः २७ सत्यधर्मा
२८ त्रिविक्रमः २९ ६९ टीका आर्द्रि ओजीयतऽइति का भोजः २१ महः पूजा तदर्हत्वान्महार्हः २२ स्वभावे
नैव भाव्यः नित्यनिष्पन्नस्वरूपत्वात्स्वभाव्यः २३ निर्जिता अमित्रा अंतस्तरा रागद्वेषादयो बाह्या रावणादयश्च येना
सौ स जितामित्रः २४ स्वात्मामृतरसास्वादनान्नित्यं प्रमोदते ध्यायतो ध्यानमात्रेण प्रमोदं कुरुतऽइति वा प्रमोदनः
२५ आनंदः स्वरूपमस्येत्यानंदः ॥ तस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः २६ स्वभावत एव
भूतानि नंदयतीति नंदनः टुणादि समृद्धौ सर्वाभिरुपपत्तिभिः समृद्धो नंदः सुखमभूंतीति श्रुतेः सुखं वैषयि
कं नास्य विद्यतेऽइति वानंदः यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः २७ सत्यो धर्मो ज्ञानादयो यस्य स स
त्यधर्मा स सत्यधर्मा इति श्रुतेः सत्यं यथार्थभूतार्थविषयं दर्शनमेव धर्मो यस्येति वा स सत्यधर्मा उच्यते सत्या
चारादयो अहिंसादानं स्वाध्याय एव च अयं हि परमो धर्मो यद्योगेनात्मदर्शनमिति स सत्यधर्मा २८ त्रयो विक्रमा
स्त्रिलोकेषु त्रीणि पदानि विक्रमः त्रयो लोकाः क्रांता यस्य स वा त्रीणि पदानि विक्रम इति श्रुतेः पवं वा त्रिरित्ये
वं त्रयो लोकाः कीर्तिता मुनिसत्तमैः क्रमसे तांस्त्रीन् सर्वान् त्रिविक्रमोऽसि जनार्दन इति हरिवंशे २९ ६९ श्लोकः ॥
महर्षिकपिलाचार्यः ३० कृतज्ञो ३१ मेदनीपति ३२ त्रिपद ३३ त्रिदशाध्यक्षो ३४ महाशृंगः ३५ कृतांतकृत् ३६
७० टीका महर्षिः कपिलाचार्य इति सविशेषणमेकं नाम महांश्चासावृषिश्चेति महर्षिः कृत्स्नस्य वेदस्य दर्शना
३५ त् अन्ये तु वेदैकदेशदर्शिनो ऋषयः कपिलश्चासौ सांख्यस्य शुद्धात्मतत्त्वविज्ञानस्याचार्यश्चेति कपिलाचा
र्यः महर्षिश्चासौ कपिलाचार्यश्च स महर्षिकपिलाचार्यः शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयत इति ३५

व्याससमृतेः ऋषिं प्रसूतं पुरस्तात् कपिलं महांतमिति श्रुतेः सिद्धानां कपिलो मुनिरिति स्मृतेश्च ३१ कृतं कार्यं जग
त्तात् आत्मा कृतं च जानातीति कृतज्ञः ३२ मेदिन्या भूम्याः पतिर्मेदिनीपतिः ३३ त्रीणि पदान्यस्येति त्रिपदः त्रीणि पदा
नि विचक्रम इति मंत्रवर्णात् ३४ गुणावेशेन संजातास्तिस्रो दशा अवस्थास्तासामध्यक्ष इति त्रिदशाध्यक्षः ३५ मत्स्यरू
पी महति शृंगे प्रलयांभोधौ नावं बध्वा विक्रीडत इति महाशृंगः ३६ कृतस्यांते संहारं करोतीति कृतांतकृत ॥
कृतांतं मृत्युं कृंतति वा कृतांतकृत ३७ श्लोकः महावराहो ३८ गोविंदः ३९ सुषेणः ४० कनकांगदी ४१ गुह्यो
४२ गभीरो ४३ गहनो ४४ गुप्त ४५ श्चक्रगदाधरः ४६ ७१ टीका महांश्चासौ वराहश्चेति महावराहः ३८ गोभि
र्वाणीभिर्विंदते वेदांतवाक्यैरिति गोविंदः गोभिरेव यतो वेद्यो गोविंदः समुदाहृत इति विष्णुतिल
के ३९ त्रिलोके शोभना सेना गुणात्मिका यस्य स सुषेणः ४० कनकेन विनिर्मितान्यंगदान्यस्य संतीति स कनकां
गदी ४१ रहस्योपनिषद्वेद्यत्वाद्गुहायां हृदयाकाशे निहित इति वा गुह्यः ४२ ज्ञानैश्वर्यबलादिभिर्गंभीरो गंभीरः
४३ दुःप्रवेशत्वाद्गहनः अवस्थात्रयभावाभावसाक्षित्वाद्वा गहनः वाङ्मनसागोचरत्वाद्गुप्तः एषु सर्वेषु भूतेषु गू
ढात्मा न प्रकाशत इति श्रुतेः ४५ मनस्तत्त्वात्मकं बुद्धितत्त्वात्मिकां गदां धारयन् लोकरक्षार्थं गुप्तश्चक्रगदाधरः ४६
७१ श्लोकः वेधाः ४७ स्वांगो ४८ जितः ४९ कृष्णो दृढः ५० संकर्षणोऽच्युतः ५१ वरुणो ५२ वारुणो ५३ वृक्षः ५४ पुष्करा
क्षो ५५ महामनाः ५६ ७२ टीका विदधाति सृजतीति वेधाः स्वयमेवाकृत जगत इति पृषोदरादित्वात्साधुत्वं ४७
स्वयमेव कार्यस्य करणे अंगं सहकारीति स्वांगः ४८ न केनाप्यवतारेषु जित इत्यजितः ४९ कृष्णो द्वैपायनः

कृष्णः कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेदिति विष्णुपुराणवचनात्
५० स्वरूपसामर्थ्यादेः प्रच्युत्यभावादृढः ५१ संहारसमये युगपत्प्रजाः संकर्षतीति संकर्षणः न च्योततिस्वप
दादित्युतः संकर्षणोऽच्युत इति नामैकं सविशेषणं अच्युतः प्रथितः इति पूर्वोक्तत्वात् ५२ वरुणः सायंस्वर
श्मिसंवरणात्सायं गतत्स्त्वादित्यो वरुणः स्वयमिति वृणोति वृयते वरुणः इमं मे वरुण श्रुधीहवमिति मंत्रव
र्णात् वरुणो वा इदसामहमिति भगवद्वचनात् ५२ गौरी लक्ष्मी महाभागा केशवो वारुणः स्वयमिति विष्णुपुराण
वचनात् वरुणस्यापत्यं वसिष्ठोऽगस्त्यो वा वारुणः ५४ वृक्षवदचलतया स्थित इति वृक्षः वृक्ष इव स्तब्धो दि
वि तिष्ठत्येक इति श्रुतेः ५५ व्याप्त्यर्थाद्दृहतेर्धातो पुष्करोपपदादि निप्रत्यये सति पुष्कराक्ष हृदयपुंडरीके चिंत
स्वरूपेण प्रकाशत इति पुष्कराक्षो वा ५६ सृष्टिस्थित्यंतककर्माणि मनसैव करोतीति स महामनाः मनसैव
जगत्सृष्टिं संहारं च करोति य इति विष्णुपुराणे ५७ ७२ श्लोकः भगवान् ५८ भगहा ५९ नंदी ६० वनमाली ६१
हलायुधः ६२ आदित्यो ६३ ज्योतिरादित्यः ६४ सहिष्णु ६५ गतिसत्तमः ६६ ७२ टीका ऐश्वर्यस्य समग्रस्य
वीर्यस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा यस्यास्तीति स भगवान् उत्पत्तिं प्रलयं चैव भू
तानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति विष्णुपुराणे ५८ ऐश्वर्यादिकं संहारसमये हंती
ति भगहा ५९ सुखरूपत्वादानंदी सर्वसंपद्भिः समृद्धत्वानंदी वा ६० भूततन्मात्रनिर्मितां वैजयंत्याख्यां वन
मालां वहतीति वनमाली ६१ हलमायुधमस्येति हलायुधो बलभद्राकृतिः ६२ आदित्यां कश्यपाद्वामनरू

दि

पेण जातस्त्रिविक्रमापिस्मादित्यः ६३ ... तिष्ठि सावित्रे मंडले स्थितो ज्योतिरादित्यः ६४ द्वंद्वानि शीतोष्णादीनि
सहत इति सहिष्णु ६५ गतिश्चासौ सत्तमश्चेति गतिसत्तमः ६६ ७३ श्लोकः सुधन्वा ६७ खंडपरशुः ६८ दारुणो ६९ द्रविण
प्रदः ६९ दिवस्पृक् ७० सर्वदृग्व्यासो ७१ वाचस्पतिरयोनिजः ७२ ७३ टीका शोभनमिंद्रियमयं शार्ङ्गं धनु
रस्येति सुधन्वा ६७ शत्रूणां खंडनात् खंडः परशुरस्य जामदग्न्याकृतेरिति खंडपरशुः शिवो वा अखं
ड परशुरस्येति वा ६८ सन्मार्गविरोधिनां दारुणत्वाद्दारुणः तेषामेव दारकत्वाद्दारुणः ६९ द्रविणं वांछि
तं प्रददातीति भक्तेभ्य इति द्रविणप्रदः ७० दिवस्पर्शनाद्दिवस्पृक् ७१ सर्वदृशां सर्वज्ञानानां प्रकाशकत्वात्स
र्वदृग्व्यासः अथवा सर्वदृक्चासौ व्यासश्चेति सर्वाकारं ज्ञानं सर्वदृष्टित्वात् स सर्वदृग्व्यासः ऋग्वेदादि
विभागेन चतुर्धा वेदा व्यस्ताः येन स्याद्यो वेदः षडशीतिधा कृतः द्वितीयश्चैकोत्तरशतधा कृतः सामवे
दः सहस्रधा कृतः अथर्ववेदो नवधा शाखाभेदेन कृतः अन्यानि च पुराणानि विष्णुनेन व्यस्तानीति व्यासः।
७२ वाचस्पतिरयोनिज इति सविशेषणं नामैकं वाचो विद्यायाः पतिर्वाचस्पतिः जनन्यां योन्यां न जा
यत इत्ययोनिजः ७२ ७४ श्लोकः त्रिसामा ७४ सामगः ७५ साम ७६ निर्वाणं ७७ भेषजं ७८ भिषक् ७९ संन्यासकृ
च्छमः ८१ शांतो ८२ निष्ठा शांतिः ८४ परायणं ८५ ७५ टीका देवव्रतसमाख्यातैस्त्रिभिः सामभिः स्तूयत इ
ति त्रिसामा ७४ साम गायतीति सामगः ७५ वेदानां सामवेदोस्मीति भगवद्वचनात् सामवेदः साम ७६
सर्वदुःखोपशमलक्षणं परमानंदरूपं निर्वाणं ७७ संसाररोगस्यौषधं भेषजं ७८ संसाररोगक्लेश

भीतस्य निर्मोक्षकारणं परां विद्यामुपदिशतीति भिषक् भिषक्तमं त्वा भिषजां शृणोमीति श्रुतेः ७९ मोक्षार्थं चतु
र्थमाश्रमं कृतवानिति संन्यासकृत् ८० संन्यासिनां प्रधान्येन ज्ञानसाधनं शममाचष्ट इति शमः यतीनां
प्रशमो धर्मो नियमो वनवासिनां दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणामिति स्मृतेः तत्करोति तदा
चष्ट इति वा च पवाद्यविकृतेरूपं सर्वभूतानां शमयतीति वा शमः ८१ विषयासुखेषु संगतशांताके
वले निष्क्रियं शांतमिति श्रुतेः ८२ प्रलयकाले नितरां भूतानि तत्रैव तिष्ठंतीति निष्ठा ८३ समस्ताविद्या
मानिवृत्तिः शांतिः सा ब्रह्मैकनिष्ठा शांतिरिति नाम्नैकं परमुत्कृष्टमयनं स्थानं पुनरावृत्तिकाभूतं य
त्तत्परायणं पुंलिंगपाठे बहुव्रीहिः ८४ ७५ श्लोकः शुभांगः ८५ शांतिदः ८६ स्रष्टा ८७ कुमुदः ८८ कुव
लेशयः ८९ गोहितो ९० गोपतिः ९१ गोप्ता ९२ वृषभाक्षो ९३ वृषप्रियः ९४ ७६ टीका सुंदरां तनुं धारय
न् शुभांगः ८५ रागद्वेषादिनिर्मोक्षलक्षणां शांतिं ददातीति शांतिदः ८६ सर्गादौ सर्वभूतानि ससर्ज
इति स्रष्टा ८७ कौ भूम्यां मोदत इति कुमुदः ८८ कोलिते वलनात्संवरणात्कुवलं तोयं तस्मिन् शेत इति
कुवलेशयः शयवासिवासिष्वकालादिति सप्तम्या अलुक् कुवलं बदरीफलं तस्य मध्ये शेते तक्षकः सोपि
तस्य स्वरूपविभूतिरिति वा हरिः कुवलेशयः कौ भूम्यां संश्रयते इति सर्पाणामुदरं कुवलं तस्मिन् शेषोद
रे शेत इति वा कुवलेशयः ८९ गवां वर्द्धनं पोषणं कृतवानिति गोहितो गोहितः कौ भूमेर्भीरावता

रणे स्वेच्छया शरीरग्रहणं इति वा गोहितः ९० गोर्भूम्यादेः पाति गोपतिः ९१ रक्षको जगत इति गोप्ता स्वमायया स्व
यमात्मा संवृणोतीति वा गोप्ता ९२ सर्वकामानभिवर्षतीति वृषभे इक्षणी यस्य स वृषभाक्षः वृषभो धर्मः स एव दृष्टि
रस्येति वा वृषभाक्षः ९३ वृषो धर्मः प्रियो यस्येति स वृषप्रियः वा प्रिय यस्येति पूर्वनिपात विकल्पविधा
नात्परनिपातः ९४ ७६ श्लोकः अनिवर्ती ९५ निवृत्तात्मा ९६ संक्षेप्ता ९७ क्षेमकृत् ९८ शिवः ९९ श्रीवत्स
वक्षा १०० श्रीवासः १०१ श्रीपतिः १०२ श्रीमतांवरः १०३ ७७ टीका देवासुरादिसंग्रामान्न निवर्तत इत्यनि
वर्ती वृषप्रियत्वाद्धर्मान्न निवर्तत इति वा निवर्ती ॥९५॥ स्वभावतो विषयेभ्यो निवृत्त आत्मा मनो यस्येति निवृत्ता
त्मा ॥९६॥ संहारकाले विस्तृतं जगत्सूक्ष्मरूपेण संक्षिपन् संक्षेप्ता ॥९७॥ उपपन्नस्य क्षेमं परिरक्षणं
करोतीति क्षेमकृत् ॥९८॥ स्वनामसंस्मृतिमात्रेण पावयन् शिवः ॥ शामयति पापमस्मादिति निरुक्तेः
६:॥ इति नाम्नां षष्ठं शतं विवृतं ॥१॥ कपीन्द्रो दाशार्हो ॥२॥ अजो ॥३॥ महर्षिः ॥४॥ कनकांगदी ॥५ दक्षो ॥
वनमाली ॥७॥ दिवस्पृक् ॥८॥ शामो ॥९॥ मोहिता ॥१०॥ इति दशकादि नामानि श्रीवत्सवक्षाः श्रीवास इति
श्रीवत्सकं चिह्नमस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः ॥१॥ अस्य वक्षसि श्रीरनपायिनी वसतीति श्री
वासः ॥२॥ अमृतमंथने सर्वान् सुरासुरादीन् विहाय श्रीरेनं वरयामासेति श्रीपतिः ॥ श्रीः पराशक्ति
स्तस्याः पतिरिति वा ॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च इति श्रुतेः ॥२॥
ऋग्यजुःसामलक्षणा श्रीः सा येषां तेषां श्रीमतां विरंच्यादीनां तेषां प्रधानमिति श्रीमतां वरः ॥३॥ ऋचः

सामानि यजूंषि सामानि श्रीरमृता सतामिति श्रुतेः॥४॥७७॥ श्लोकः श्रीदः॥५॥ श्रीशः॥६॥ श्रीनिवासः॥७॥ श्री
निधिः॥८॥ श्रीविभावनः॥९॥ श्रीधरः॥१०॥ श्रीकरः॥११॥ श्रेयः॥१२॥ श्रीमान्॥१३॥ लोकत्रयाश्रयः१४॥
७८ टीका॥ विविधा श्रियं भक्तानां ददातीति श्रीदः॥५॥ श्रियः ईशः श्रीशः॥६॥ श्रीर्यस्तु नित्यं वसतीति श्री
निवासः॥ श्रीशब्देन श्रीमंतो लक्ष्यंते॥७॥ सर्वशक्तिमयेऽस्मिन्निखिलाः श्रियो निधीयंत इति श्रीनिधिः॥८॥
कर्मानुरूपेण विविधाः श्रियः सर्वभूतानां विभावयतीति श्रीविभावनः॥९॥ सर्वभूतानां जननीमीश्वरीं
श्रियं वक्षसि वहन् श्रीधरः॥१०॥ स्मरतां शृण्वतां कीर्तयतामर्चयतां स्तुवतां भक्तानां श्रियं करोतीति श्री
करः॥११॥ अनपायिसुखावाप्तिलक्षणं श्रेयस्तच्च परस्यैव ब्रह्मणो रूपमिति श्रेयः॥१२॥ श्रियोऽस्य
संतीति श्रीमान्॥१३॥ त्रयाणां लोकानामाश्रयत्वाल्लोकत्रयाश्रयः॥१४॥७८॥ श्लोकः॥ स्वक्षः॥१५॥ स्वं
गः॥१६॥ शतानंदो॥१७॥ नंदिः॥१८॥ ज्योतिर्गणेश्वरः॥१९॥ विजितात्मा॥२०॥ विधेयात्मा॥२१॥ सत्कीर्तिः॥२२
छिन्नसंशयः॥२३॥७९॥ टीका॥ शोभने पुंडरीकायते अक्षिणी यस्येति स्वक्षः॥१५॥ शोभनान्यंगानि यस्य
इति स्वंगः॥१६॥ एक एव परमानंद उपाधिभेदेन शतधा भिद्यत इति शतानंदः॥१७॥ एतस्यैवानंदस्यान्या
नि भूतानि मात्रामुपजीवंतीति श्रुतेः॥१७॥ परमानंदविग्रहः नंदिः॥१८॥ ज्योतिर्गणानामीश्वरो ज्योतिर्ग
णेश्वरः॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः। यदादित्यगतं तेज इत्यादि स्मृते
श्च॥१९॥ विजित आत्मा मनो येन स विजितात्मा॥२०॥ न केनापि विधेयात्मा स्वरूपमस्येति

अविधेयात्मा॥२१॥ सती अवितथा कीर्तिरस्येति सत्कीर्तिः॥२२॥ करतलामलकवत् सर्वं साक्षात्कृतवतः का
पि संशयो नास्तीति छिन्नसंशयः॥२३॥७९॥ श्लोकः॥ उदीर्णः॥२४॥ सर्वतश्चक्षुः॥२५॥ अनीशः॥२६॥ शाश्वत
स्थिरः॥२७॥ भूशयो॥२८॥ भूषणो॥२९॥ भूतिः॥३०॥ विशोकः॥३१॥ शोकनाशनः॥३२॥८०॥ टीका॥ सर्व
भूतेभ्यः समुत्कृष्टत्वादुदीर्णः॥२४॥ सर्वतः सर्वं स्वचैतन्येन पश्यतीति सर्वतश्चक्षुः। सर्वतश्चक्षुरिति
श्रुतेः॥२५॥ न विद्यते स्य ईशस्त्वनीशः॥ न तस्येशः कश्चनेति श्रुतेः॥२६॥ शश्वद्भवन्नपि न विक्रियायाक
दाचिदप्युपैतीति शाश्वतः स्थिरस्त्वेकं नाम॥२७॥ लंकां प्रति मार्गमन्वेषमाणः सागरोपांते भूमावि
धिशेत इति भूशयः॥२८॥ स्वेच्छावतारैर्बहुभिर्भूमिं भूषयन् भूषणः॥२९॥ भूतिर्भवनं सत्ता॥ विभू
तिर्वा॥ समस्तभूतानां कारणत्वेन वा भूतिः॥३०॥ विगतः शोको यस्य परमानंदैकस्वरूपत्वादि
ति विशोकः॥३१॥ स्मरणमात्रेण भक्तानां शोकं नाशयतीति शोकनाशनः॥३२॥८०॥ श्लोकः॥ अर्चिष्मा॥
३३॥ अर्चितः॥३४॥ कुंभो॥३५॥ विशुद्धात्मा॥३६॥ विशोधनः॥३७॥ अनिरुद्धो॥३८॥ अप्रतिरथः॥३९॥
प्रद्युम्नो॥४०॥ मितविक्रमः॥४१॥८१॥ टीका॥ अर्चिष्मंतो परीयेनार्चिषा चंद्रसूर्यादयः अर्चिष्मंतो भवंत्यतोऽर्चि
ष्मान्॥३३॥ सर्वलोकार्चितैर्विरिंच्यादिभिरर्चितत्वादर्चितः॥३४॥ कुंभवदस्मिन् विश्वं सचराचरं
सर्वं प्रतिष्ठितमिति कुंभः॥३५॥ गुणत्रयातीततया विशुद्ध आत्माऽस्येति विशुद्धात्मा॥३६॥ स्मृतिमा

त्रं पापानां कृतनादि शोधनः ॥४२॥ चतुर्व्यूहे ऽनिरुद्धः ॥ न निरुध्यतेऽस्य शत्रूणां कदाचिदपीत्यनिरु
द्धो वा ॥४६॥ अप्रतिरथः प्रतिपक्षोऽस्येन विद्यत इत्यप्रतिरथः ॥ प्रकृष्टं द्युम्नं द्रविणमस्येति प्रद्यु
म्न ॥ चतुर्व्यूहात्मा वा ॥४०॥ अमितो विक्रमोऽस्येत्यमितविक्रमः ॥ अहिंसितविक्रमः अपरिच्छिन्ने
विक्रमो वा मीञ् हिंसायां ॥४१॥ ९॥ श्लोकः कालनेमिनिहा ॥४२॥ वीरः ॥४३॥ शूरः ॥४४॥ शूरजनेश्वरः ॥४५॥
त्रिलोकात्मा ॥४६॥ त्रिलोकेशः ॥४७॥ केशवः ॥४८॥ केशिहा ॥४९॥ हरिः ॥५०॥ ९२॥ टीका ॥ कालनेमिनामानं
महासुरं निजघानेति कालनेमिनिहा ॥४१॥ गतागतं विनाशितशत्रूणां कुलानि विजित्य विराजत इति वीरः ॥
४३॥ शूरकुलोद्भवत्वाच्छूरः ॥ वीर विक्रान्ताविति धातुपाठात् वीरः शूरः ॥४४॥ शूरजनानां वासवादीनां
शौर्यातिशयेन श्रेष्ठ इति शूरजनेश्वरः ॥४५॥ त्रयाणां लोकानामन्तर्यामितया आत्मेति त्रिलोकात्मा ॥ त्रियो
लोकास्तस्मात्परमार्थतो न भिन्ना इति वा त्रिलोकात्मा ॥४६॥ त्रयो लोकास्तदाज्ञया स्वेषु वर्त्मसु वर्तन्त इति
त्रिलोकेशः ॥४७॥ केशसंज्ञिता सूर्यादिसंक्रान्ता अंशवस्तद्वत्तया केशवः ॥ अंशवो ये प्रकाशन्ते मम ते केशसं
ज्ञिताः ॥ सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमा इति महाभारते ॥ ब्रह्मविष्णुशिवाख्याः शक्तयः केशसं
ज्ञिताः तद्वत्तया वा केशवः ॥ त्रयः केशिन इति श्रुतेः ॥ त्रयः केशिनः मत्केशो वसुधातलस्पर्शो केशवः
एवंविधं धनं त्रयमिति पर्यायत्वेन प्रयुक्तः ॥ को ब्रह्मेति समाख्यातः ईशोऽहं सर्वदेहिनाम् ॥ आवां तवांशसंभूतौ ततः केशवः ॥
नाम वानिति हरिवंशे ॥४८॥ केशिनामानं दैत्यं हतवानिति केशिहा ॥४९॥ सहेतुकं संसारं हरतीति हरिः ॥

५०॥ ९२॥ श्लोकः कामदेवः ॥५१॥ कामपालः ॥५२॥ कामी ॥५३॥ कान्तः ॥५४॥ कृतागमः ॥५५॥ अनिर्देश्यवपुः ॥५६॥ विष्णुः
॥५७॥ वीरः ॥५८॥ अनन्तः ॥५९॥ धनंजयः ॥६०॥ ९३॥ टीका ॥ धर्मादिपुरुषार्थचतुष्टयं वाञ्छद्भिः काम्यत इति कामः ॥ कामश्चा
सौ देवश्चेति कामदेवः ॥५१॥ कामिनां कामान् पालयतीति कामपालः ॥५२॥ पूर्णकामस्वभावत्वात्कामी ॥ कामो
ऽस्यास्तीति कामी वा ॥ सोऽकामयतेति श्रुतेः ॥५३॥ द्विपरार्द्धान्ते कस्य ब्रह्मणो ऽन्तो नाशो यस्मादिति कान्तः ॥ अनिरु
परमदेहवत्त्वाद्वा कान्तः ॥५४॥ कृत आगम श्रुतिस्मृत्यादिलक्षणो येन स कृतागमः ॥ श्रुतिस्मृती ममैवाज्ञे यः
स्तां चैतत्प्रवर्तते ॥ आज्ञाभंगी मम द्वेषी मद्भक्तोऽपि न वैष्णव इति भगवद्वचनात् ॥ वेदाः शास्त्राणि विज्ञान
मेतत्सर्वं जनार्दनादिति वचनात् ॥५५॥ इदं तदीदृगेवेति निर्देष्टुमशक्यं यतो गुणातीतत्वाद्रूपमस्येति अ
निर्देश्यवपुः ॥५६॥ रोदसी व्याप्य कान्तिरभ्यधिका स्थितेति विष्णुः ॥ व्याप्य मे रोदसी पार्थ कान्तिरभ्यधिका स्थिता ॥
क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञित इति महाभारते ॥५७॥ गत्यादिमत्त्वाद्वीरः ॥ वी गतिप्रजननकान्त्यशन
खादनेष्विति धातुपाठात् ॥५८॥ व्यापित्वान्नित्यत्वात्सर्वात्मत्वाद्देशतः कालतो वस्तुतश्चापरिच्छिन्नोऽनन्तः ॥
गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः ॥ नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः इति विष्णुपुराणवच
नात् ॥ अनन्तः ॥ सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेश्चानन्तः ॥५९॥ यद्दिग्विजये प्रभूतं धनं अजयत्तेन धनंजयो
ऽर्जुनः ॥ पाण्डवानां धनंजय इति भगवद्वचनात् ॥६०॥ ९३॥ श्लोकः ॥ ब्रह्मण्यो ॥६१॥ ब्रह्मकृत् ॥६२॥ ब्रह्मा ॥६३॥ ब्रह्म
॥६४॥ ब्रह्मविवर्द्धनः ॥६५॥ ब्रह्मवित् ॥६६॥ ब्राह्मणो ॥६७॥ ब्रह्मी ॥६८॥ ब्रह्मज्ञो ॥६९॥ ब्राह्मणप्रियः ॥७०॥ ९४॥ टीका ॥ तियो

वेदाश्च जातिश्च ज्ञानेन च ब्रह्मसंज्ञितानि तस्मै हितत्वाद्ब्रह्मण्यः ॥६१॥ तपआदीनां कर्तृत्वाद्ब्रह्मकृत् ॥६२॥ ब्रह्मात्म
ना सर्वं सृजतीति ब्रह्मा ॥६३॥ बृहत्त्वाद्बृंहणत्वाच्च सत्यादिलक्षणं ब्रह्म ॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः ॥ प्र
त्यस्तमितभेदं यत्सत्तामात्रमगोचरं ॥ वचसामात्मसंवेद्यं ज्ञानं तद्ब्रह्मसंज्ञितमिति विष्णुपुराणे ॥६४॥
तपोब्रह्मादीनां विवर्द्धनाद्ब्रह्मविवर्द्धनः ॥६५॥ वेदं वेदार्थं च यथावद्वेत्तीति वा ब्रह्मवित् ॥६६॥ ब्रह्मा
त्मना ब्राह्मणात्मना समस्तानां लोकानां प्रवचनं कुर्वन् वेदस्यायमिति ब्राह्मणः ॥६७॥ ब्रह्मसंज्ञितास्त
देशभूतान्यस्य सन्तीति ब्रह्मी ॥६८॥ वेदान्स्वात्मभूतान्जानातीति ब्रह्मज्ञः ॥६९॥ ब्राह्मणानां प्रियः
ब्राह्मणाः प्रिया अस्येति वा ब्राह्मणप्रियः ॥ घ्नन्तं शपन्तं परुषं वदन्तं यो ब्राह्मणं न प्रणमेद्यथाहं स पाप
कृद्ब्रह्मदवाग्निदग्धो वध्यश्च दंड्यश्च न चास्मदीय इति भगवद्वचनं ॥ यं देवं देवकी देवी वसुदेवादजी
जनत् ॥ भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिरिति महाभारते ॥७०॥ ८४ ॥ श्लोकः ॥ महाक्रमो
७१ ॥ महाकर्मा ॥७२॥ महातेजा ॥७३॥ महोरगः ॥७४॥ महाक्रतुः ॥७५॥ महायज्वा ॥७६॥ महायज्ञो ॥७७॥ महा
हविः ॥७८॥८५॥ टीका ॥ महान्तः क्रमाः पादविक्षेपा अस्येति महाक्रमः ॥ शं नो विष्णुरुरुक्रम इति श्रुतेः
७१॥ महज्जगदुत्पत्त्यादिकर्मास्येति महाकर्मा ॥७२॥ यदीयेन तेजसा भास्करादयस्तेजस्विनस्तस्य

महत्तेज इति महातेजाः ॥ येन सूर्यस्तपति तेजसेद्ध इति श्रुतेः ॥ यदादित्यगतं तेजस्तत्तेजो विद्धि मामकमिति
भगवद्वचनात् ॥ शौर्यशौर्यादिभिर्महद्भिः समलंकृतः इति वा महातेजाः ॥७३॥ महांश्चासावुरगश्चेति महो
रगः सर्पाणामस्मि वासुकिरिति भगवद्वचनात् ॥७४॥ महांश्चासौ क्रतुश्चेति महाक्रतुः ॥ यथाश्वमेधः
क्रतुराडिति मनुवचनात् ॥ सोपि स एवेति श्रुतेः ॥७५॥ महांश्चासौ यज्वा चेति महायज्वा ॥ लोकसंग्रहार्थं
यज्ञान्प्रवर्तयन्महायज्ञः स महायज्वा ॥७६॥ महांश्चासौ यज्ञश्चेति महायज्ञः ॥ यज्ञानां जपयज्ञोस्मी
ति भगवद्वचनात् ॥७७॥ महच्चतद्धविर्महाहविः ब्रह्मात्मनि सर्वं जगत्तदात्मतया हूयत इति महाहविः महा
क्रतुरित्यादौ बहुव्रीहिर्वा ॥७८॥ श्लोकः ॥ स्तव्यः ॥७९॥ स्तवप्रियः ॥८०॥ स्तोत्रं ॥८१॥ स्तुतिः ॥८२॥ स्तोता ॥८३॥ रणप्रियः ॥
८४॥ पूर्णः ॥८५॥ पूरयिता ॥८६॥ पुण्यः ॥८७॥ पुण्यकीर्तिः ॥८८॥ अनामयः ॥८९॥८६॥ टीका ॥ सर्वैः स्तूयते न स्तोता कस्यचिदि
ति स्तव्यः ॥७९॥ अत एव स्तवप्रियः ॥८०॥ येन स्तूयते तत्स्तोत्रं ॥ गुणसंकीर्तनात्मकं तद्धरिरेवेति श्रुतेः ॥८१॥ स्तु
तश्च स्तवनक्रियाविषयः ॥ स्तुतिरिति पाठे स्तुतिः स्तवनक्रिया ॥८२॥ स्तोतापि स एव ॥८३॥ प्रियरणमस्य यः
पंच महायुधानि धत्ते सततं लोकरक्षार्थं मनोरणप्रियः ॥८४॥ पूर्णः सर्वैः कामैः सकलाभिश्च शक्तिभिः
संपन्न इति वा पूर्णः ॥८५॥ न केवलं पूर्ण एव पूरयिता च सर्वेषां संपद्भिः ॥८६॥ स्मृतिमात्रेण किल्बिषाणि
नयतीति पुण्यः ॥८७॥ पुण्या कीर्तिरस्य यतः पुण्यमावहति अस्य कीर्तनमिति पुण्यकीर्तिः ॥८८॥

श्रांतरैर्भ्रांतैः कमठैः व्याधिभिः नपीड्यत इत्यनामयः ॥ ८५१ ॥ ८६ ॥ श्लोकः मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमनाः हविः ॥ ८७ ॥ टीका ॥ मनसो वेग इव वेगो यस्य सर्वगतत्वादिति मनोजवः ।
चतुर्दश विद्यानां बाह्यविद्यानां समयानां च प्रणेता प्रवक्ता चेति तीर्थकरः ॥ हयग्रीवरूपेण मधुकैटभौ ह
त्वा विरिंचाय सर्गादौ सर्वाः श्रुतीरन्यांश्च विद्या उपादिशत ॥ वेदबाह्याश्च विद्याः स्ववैरिणां वंचनायोपा
दिशदिति पौराणिकाः कथयंति वसु सुवर्णं रेतोस्येति वसुरेताः ॥ अत एव स सर्जादौ तासु वीर्यमवा
सृजत ॥ तदंडमभवद्धैमं सहस्रांशुसमप्रभमिति व्यासवचनात ॥ ब्रह्मणः कारणं परमिति वचनात ।
वसुधनं प्रकर्षेण ददाति साक्षाद्धनाध्यक्षोयमितरस्तु तत्प्रसादाद्धनाध्यक्ष इति वसुप्रदः ॥ वसुप्रकृष्टं मो
क्षाख्यं फलं भक्तेभ्यः प्रददातीति द्वितीयो वसुप्रदः ॥ विज्ञानमानंदं ब्रह्म रातेर्दातुः परायणमिति माणस्य
तद्विद इति श्रुतिः ॥ सुरारीणां वसूनि प्रकर्षेण खंडयन्वा वसुप्रदः ॥ वसुदेवस्यापत्यमिति वासुदेवः ॥
वसु आच्छादने वस्ते प्राच्छादयत्यात्मनः स्वरूपं माययेति वसुः ॥ वसंति सर्वभूतानि तत्र तेषु चेष वसतीति
वा वसुः ॥ अविशेषेण सर्वेषु विषयेषु वसतीति वसुः तस्मनोस्येति वसुमनाः ॥ ब्रह्म हविर्भगवद्वचना
द्धविः ॥ ८८ ॥ ८७ ॥ श्लोकः ॥ सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ॥ शूरसेनो यदुश्रेष्ठः सन्निवासः सुया

मुनः ॥ ९८ ॥ टीका ॥ अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रुतेः ॥ ब्रह्मास्तीति ये विदुस्ते संतस्तैः प्राप्यत इति
सद्गतिः सतां गतिः ॥ सतीसमुत्कृष्टा गतिर्बुद्धिरस्येति वा सद्गतिः सती कृतिर्जगद्रक्षणादिलक्षणा यस्य यस्मा
त्तेजस्सत्कृतिः ॥ ७०० इति नाम्नां सप्तमं शतं विवृतं ॥ ७ ॥ श्रीवत्सः श्रीकरः श्रियेयमाविशोकोमितविक्रमः काम
देव ब्रह्मण्य महाक्रमसत्तोत्र तीर्थकरः ॥ इति दश नामानि ॥ सजातीयविजातीयस्वगतभेदरहितानुभू
तिः सत्ता ॥ एकमेवाद्वितीयं ब्रह्मेति श्रुतेः ॥ स एव परमात्मा सद्रूपाचिदात्मको बोधो बहुधाभासमानत्वा
त्सद्भूतिः ॥ नानात्वप्रतीतेर्बाध्यमानत्वान्नसन्नप्यसदिति अत श्रौतो यौक्तिको बाधः प्रपंचस्य विवक्षितः ॥
सतां तत्वविदां प्रकृष्टमयनमिति सत्परायणः ॥ शूरमत्यमुखाः वीराः सैनिकाः शौर्यशालिन्यो यस्यां से
नायां सा शूरसेना यस्य स शूरसेनः ॥ यदूनां प्रधानत्वाद्यदुश्रेष्ठः ॥ सतां विदुषां माश्रयः सन्निवासः ॥
शोभना यामुना यमुनासंबंधिनः परिवेष्टारो यस्येति सुयामुनो गोपवेषधरः ॥ यामुनाः परिवेष्टारः पद्मा
सनादयः शोभना अस्येति वा सुयामुनः ॥ ८८ ॥ श्लोकः भूतावासो वासुदेवः सर्वासुनिलयोनलः ॥ दर्पहा दर्प
दो दृप्तो दुर्द्धरोथापराजितः ॥ ८९ ॥ टीका ॥ भूतान्यत्राभिमुख्येन वसंतीति भूतावासः ॥ वसंति त्वयि भूतानि भू
तावासस्ततो भवानिति हरिवंशे ॥ जगदाच्छादयति माययेति वासुः ॥ स एव देवश्चेति वासुदेवः ॥ छादयामि
जगद्विश्वं भूत्वा सूर्य इवांशुभिरिति भगवद्वचनात ॥ सर्व एवासवो मुख्याः प्राणा जीवात्मके यस्मिन्नव्यये

धर्मविरुद्धेष्वपीतिष्ठ
निलीयंते सर्वासु निलयः अलंपर्याप्तिः सर्वशक्तिसंपदोस्य मविद्यतत्वयनलः ॥ धर्मेव र्त्मनिवर्तमानानाद
तां दर्पं हंतीति दर्पहा ॥ धर्मवर्त्मनिवर्तमानानां दर्पं गर्वं ददातीति दर्पदः ॥ धर्मेव र्त्मनिवर्तमानानां दर्पदः ॥ निशंक्यधारणा यस्य
र्पमर्पं ददातीति वा दर्पदः ॥ स्वात्मामृतरसास्वादनान्नित्यं प्रमुदितत्वाद्दृप्तः ॥ निशंक्यधारणायस्य
प्रणिधानादिषु सर्वोपाधिविनिर्मुक्तत्वात्तपापि तत्प्रसादेन कैश्चिद्दुःखेन हृदये धार्यते जन्मांतरसह
स्रेषु भावनया योगात्तस्मादिति दुर्द्धरः ॥ क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अथवा कोपि गति
र्दुःखं देहवद्भिरवाप्यते इति भगवद्वचनात् ॥ नांतरैः रागादिभिः शत्रुभिर्नवा देवैर्दानवादिभिरपि परा
जितस्स्यपराजितः ॥ ८८ ॥ श्लोकः ॥ विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तः शतमू
र्तिः शताननः ॥ ८९ ॥ टीका ॥ विश्वमूर्तिरस्य सर्वात्मकत्वादिति विश्वमूर्तिः ॥ शेषाद्रिपर्यंकशायिनो महती
मूर्तिरस्येति स महामूर्तिः ॥ ज्ञानमयी मूर्तिः स्वेच्छया तैजसी वा मूर्तिः दीप्ताप्रकाशमयी मूर्तिर्यस्य सदी
प्तमूर्तिः ॥ कर्मनिबंधना मूर्तिरस्य न विद्यत इत्यमूर्तिमान् ॥ अवतारेषु स्वेच्छया लोकानामुपकारिणीर्व
ह्वीमूर्तीर्भजत इत्यनेकमूर्तिः ॥ यद्यप्यनेकमूर्तित्वं तथाप्यव्ययमीदृश इति न व्यज्यत इत्यव्यक्तः ॥ नानावि
कल्पनामूर्तयः संविदाकृतेः संतीति शतमूर्तिः ॥ विश्वादिमूर्तित्वं यतोऽत एव शताननः ॥ ८९ ॥ श्लोकः ॥
एकोनैकः सवः कः किं यत्तत्पदमनुत्तमं ॥ लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ॥ ९१ ॥ टीका ॥ ।८२।

परमार्थतः सजातीयविजातीयस्वगतभेदविनिर्मुक्तत्वादेकः ॥ एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतेः ॥ मायया नेक
रूपत्वादनेकः ॥ इंद्रो मायाभिः पुरुरूप ईयत इति श्रुतेः ॥ सोमोयत्राभिषूयते सोऽध्वरः सवः ॥ कः शब्दः सुख
वाचकस्तेन स्तूयत इत्यण्प्रत्ययांतः कः ॥ कं ब्रह्मेति श्रुतेः ॥ सर्वपुरुषार्थरूपत्वाद्ब्रह्मैव विचार्यत इति ब्रह्म किं
यच्छब्देन स्वतःसिद्धवस्तूद्देशवाचिना ब्रह्म निर्दिश्यत इति ब्रह्म यत् ॥ यतो वा इमानि भूतानि जायंत इति
श्रुतेः ॥ तनोतीति तद्ब्रह्म ॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति भगवद्वचनात् ॥ पद्यते मुमु
क्षुभिरिति पदं ॥ यस्मादुत्कृष्टं नास्ति तदनुत्तममिति सविशेषणमेकं नाम पदमनुत्तममिति ॥
आधारभूते तस्मिन्सकललोकावध्यंत इति लोकबंधुः ॥ लोकानां जनकत्वाज्जनकोपमो बंधुर्ना
स्तीति जनकत्वाद्वा लोकबंधुः ॥ बंधुकृत्यं हिताहितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा लोकबंधुः ।
लोकैर्नाथ्यते याच्यते तानुपतपति ते भ्यः आशास्ते तेषामिष्ट इति वा लोकनाथः ॥ नाथृ नाधृ याञ्चोपतापै
श्वर्याशीःष्विति धातुपाठात् ॥ मधुकुले जातत्वान्माधवः ॥ भक्तानां स्नेहवान् भक्तवत्सलः ॥ ९० ॥ श्लोकः
सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी ॥ वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ९२ ॥ टीका ॥ सुवर्ण
स्य वर्णः इव वर्णो यस्य स सुवर्णवर्णः ॥ यदा पश्यः पश्यते रुक्मवर्णं कर्तारमिति श्रुतेः ॥ हेमेवांगं वपुरस्येति हे
मांगः ॥ य एषोंतरादित्ये हिरण्मयः पुरुष इति श्रुतेः ॥ वराणि शोभनानि अंगानि अस्येति वरांगः ॥ चंद
नैराह्लादनैरंगदैः केयूरैश्च भूषित इति चंदनांगदी ॥ वीरान् असुरमुख्यान् हिरण्यकशिपुप्रभ

88

भतीन् वणादीन्श्र स्मृतस्मात्तस्मात्कृत्स्नस्य धर्मत्राणाय सुरान्नागादींश्च हंतीति वीरहा॥ समानोऽस्य न विद्यते सर्वविलक्षणत्वादिति विषमः उच्यते॥ न त्वत्समोऽस्त्यभ्यधिकः इति अर्जुनवचनात्। सर्वविशेषणै रहितत्वात् शून्यवच्छून्यः॥ घृता विगलिता आशिषः अस्येति घृताशी॥ च्युतरणादीत्येतोः॥ न स्वरूपात् सामर्थ्यात् चज्ञानादिकाद्गुणात् चलनं विद्यते यस्येत्यचलः॥ कीर्तितो वाऽच्युतस्त्वचलः॥ वायुरूपेण चलतीति चलः॥५२॥ श्लोकः॥ अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्॥ सुमेधा मेधजो धन्यः सत्यमेधा धराधरः॥५३॥ टीका॥ अनात्मवस्तुष्वात्माभिमानो नास्त्यस्य शुद्धसंवेदनाकृतेरित्यमानी॥ स्वमायया सर्वेषामनात्मस्वात्मरूपस्य त्वात्माभिमानं ददातीति मानदः॥ भक्तानां सत्कारं मानं च ददातीति मानदः॥ अथ भक्तानामधर्मिणां सत्कारं खंडयतीति वा मानदः॥ तत्त्वविदामनात्मन्यात्माभिमानं खंडयतीति वा मानदः॥ सर्वैः माननीयः पूजनीयः सर्वेश्वरत्वादिति मान्यः॥ चतुर्दशानां लोकानामीश्वरत्वाल्लोकस्वामी॥ त्रीन् लोकान् धारयतीति त्रिलोकधृक्॥ शोभना स्वाभाविकी प्रज्ञा मेधाऽस्येति सुमेधाः॥ नित्यमसुचप्रजामेधयोरिति समासांतोऽसुच्प्रत्ययः॥ मधे पुरे जायते इति मेधजः॥ धन्यः कृतार्थः॥ सत्या अवितथ्या मेधाऽस्येति सत्यमेधाः॥ अंशैरशेषैः शेषाद्यैः धारयन् धरामिति धराधरः॥५३॥ श्लोकः॥ तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः॥ प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः॥५४॥ टीका॥ तेजसाम्भांसि आदाय सर्वदा आदित्यरूपेण वर्षतीति तेजोवृषः॥ द्युतिमंगगतां कांतिं धारयन् द्युतिधरः॥ ५२

६२

89

सर्वशस्त्रभृतां श्रेष्ठ इति सर्वशस्त्रभृतां वरः॥ भक्तैरुपहृतं पत्रपुष्पादिकं प्रगृह्णातीति प्रग्रहः॥ धावतो विषयारण्ये दुर्दांतेन्द्रियवाजिनः तत्प्रसादेन रश्मिनेव बध्नातीति वा प्रग्रहः वत्प्रग्रहः॥ अरश्मी चेति पाणिनिस्मरणात् प्रग्रहशब्दस्य साधुत्वात्॥ स्ववशेन सर्वाणि निगृह्णातीति सर्वाणि सुरारीन् निगृह्णातीति वा निग्रहः॥ विगतमग्रमंतो विनाशोऽस्येति व्यग्रः॥ भक्तजनाभीष्टप्रदानेषु व्यग्र इति वा व्यग्रः॥ शृंगो नैकशृंगः चत्वारि शृंगा त्रयोऽस्य पादा इति मंत्रवर्णात्॥ निगदेन मंत्रेणाग्रे जायते इति॥५६॥ निशब्दलोपं कृत्वा गदाग्रजः यद्वा गदो नाम वासुदेवस्यावरजस्तस्मादग्रे जायत इति वा गदाग्रजः॥५४॥ श्लोकः॥ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः॥ चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥५५॥ टीका॥ चतस्रो मूर्तयो अस्येति वा चतुर्मूर्तिः चत्वारो वा विराट्सूत्राव्याकृततुर्यात्मानोऽस्येति चतुर्मूर्तिः॥ सिता पीता रक्ता कृष्णा चतस्रो मूर्तयोऽस्येति वा चतुर्मूर्तिः चत्वारो वा बाहवोऽस्येति चतुर्बाहुरिति नाम वासुदेवे रूढं॥ शरीरं पुरुषश्छंदः पुरुषो वेदपुरुषो महापुरुष इति वह्वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा अस्येति चतुर्व्यूहः॥ आश्रमाणां चवर्णानां चतुर्णां यथोक्तकारिणां गतिः चतुर्गतिः॥ रागद्वेषादिरहितत्वाच्चतुरं मन आत्माऽस्येति चतुरात्मा॥ मनोबुद्ध्यहंकारचित्तचतुष्टयात्मकत्वादेति चतुरात्मा॥ धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयं भवन्त्युत्पद्यते यस्मादिति चतुर्भावः॥ यथावत् चतुर्णां वेदनामर्थान् वेत्तीति चतुर्वेदवित्॥ एकः पादोऽस्येति एकपात्॥ पादोऽस्य विश्वा भूतानीति श्रुतेः॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवद्वचनात्॥५५॥ श्लोकः॥ समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः॥ दुर्लभो दुर्गमो दुर्गो

ऽदुरावासो दुरारिहा॥८६॥टीका॥ संसारचक्रस्य सम्यगावर्त्तक इति समावर्त्तः॥ सर्वत्र वर्त्तमानत्वाद निवृत्तात्मा न
निवृतः कुतोप्यात्मायस्येति अनिवृत्तात्मा॥ यद्वा निवृत्तात्मा मनोयस्य विषयेभ्य इति वा निवृत्तात्मा॥ जेतुं न श
क्यत इति दुर्जयः॥ भयहेतुत्वादस्याज्ञां सूर्यादयो नातिक्रामंतीति दुरतिक्रमः॥ भयादस्याग्निस्तपति भयात्त
पति सूर्यः भयादिंद्रश्च वायुश्च मृत्युर्द्धावति पंचम इति मंत्रवर्णात्॥ महद्भयं वज्रमुद्यतमिति च॥ दुर्लभ याभक्त्या
लभ्यत्वाद् दुर्लभः॥ जन्मांतरसहस्रेषु तपोध्यान समाधिभिः॥ नराणां क्षीणपापानां कृष्णेभक्तिः प्रजायत इति व्यास
वचनात्॥ दुःखेन ज्ञायते गम्यत इति दुर्गमः॥ अंतरायैः प्रतिहतैर्जनैर्दुःखादवाप्यत इति दुर्गः॥ दुःखेनावासस्यते
चित्ते समाधौ योगिभिरिति दुरावासः॥ दुरारिहा दुर्मार्गिणो दानवादयस्तान् हंतीति दुरारिहा॥८६॥ श्लोकः
शुभांगो लोकसारंगः सुतंतुस्तंतुवर्द्धनः॥ इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः॥८७॥ टीका॥ शोभनैरंगैरवय
वैर्विराजत इति शुभांगः॥ लोकानां सारं पश्यतीति लोकसारंगः॥ लोके सारः प्रणवस्तं प्रतिपत्तव्य इति
वा लोकसारंगः॥ पृषोदरादित्वात्साधुत्वं॥ प्रजापतिर्लोकानभ्यपतदिति श्रुतेः॥ शोभनस्तंतुर्विस्तीर्णः अ
प्रपंचोऽस्येति सुतंतुः॥ तमेव तंतुं वर्द्धयति छेदयतीति तंतुवर्द्धनः॥ इंद्रस्य कर्म वा स्य कर्मेतींद्रकर्मा ऐश्वर्यक
र्मेत्यर्थः॥ महांति वियदादीनि भूतानि कर्माणि कार्याण्यस्येति महाकर्मा॥ कृतमेव नकर्त्तव्यं किंचित्क
र्मास्य विद्यत इति कृतकर्मा॥ धर्मात्मकं वा कर्म कृतमनेनेति कृतकर्मा॥ कृतो वेदात्मक आगमोऽनेनेति कृ
तागमः॥ अस्य वा एतस्य महतो भूतस्य निश्वसितमेतदिति श्रुतेः॥८७॥ श्लोकः॥ उद्भवः सुंदरः सुंदो रत्न

६६ ६४

नाभः सुलोचनः॥ अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी॥८८॥ टीका॥ उत्कृष्टं भवं जन्मस्वेच्छया भजतीत्युद्
भवः॥ उद्गतभवगतं जन्मास्य समस्तकारणत्वादिति वोद्भवः॥ विश्वातिशायि सौभाग्यशालित्वात्सुंदरः॥ सु
सुखं तद्ददातीति सुंदः॥ पृषोदरादित्वात्पररूपं॥ सुष्ठु उंदत इति सुंदः॥ आर्द्रीभाववाचकत्वात्करुणाकरइत्य
र्थः॥ रत्नशब्देन शोभा लक्ष्यते रत्नवत्सुंदरनाभिरस्येति रत्ननाभः॥ शोभनं लोचनं नयनं ज्ञानं वास्येति
सुलोचनः॥ ब्रह्मादिभिः पूज्यतमैरर्चनीयत्वादर्कः॥ वाजमन्नमर्थिभ्यः सनोति ददातीति वाजसनः॥
प्रलयांभसि शृंगवान्मत्स्यविशेषरूपी शृंगी॥ मत्स्यपी योऽतिशायनोऽस्ति शये नारीन् जयति जयहेतुरिति
वा जयंतः सर्वविषयं ज्ञानमस्येति सर्ववित्॥ अभ्यंतरान् रागादीन् बाह्यान् हिरण्याक्षादीन् शत्रून् जेता
न जेतुं शीलमस्येति जयी॥ सजोविनी स्यधिकारे जिद्रक्षीत्यादि पाणिनी यवचनादिनि प्रत्ययः॥ सर्ववि
च्चासौ जयी चेति सर्वविज्जयीत्येकं नाम सविशेषणं॥८८॥ श्लोकः सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः॥
महाह्रदो महागर्त्तो महाभूतो महानिधिः॥८९॥ टीका॥ बिंदवोऽवयवाः सुवर्णसदृशा यस्येति सुवर्णबिंदुः॥
आ प्रणखात्सर्व एव सुवर्ण इति श्रुतेः॥ शोभनो वर्णः अक्षरं बिंदुश्च यस्मिन्मंत्रे स मंत्रात्मा वा सुवर्णबिं
दुरिति॥ इतिनाम्नामष्टमशतं विवृतं॥८॥ मत्तोऽनलोऽनेकमूर्त्तिः नरवीरहा त्रिलोकधृक् निग्रहः जातु
वेदविद् दुरारिहा सुंदरः॥ इति दशकादिनामानि॥ रागद्वेषादिभिः शब्दादिविषयैश्चेंद्रियादिभिः

न लभ्यते न चाल्पतस्त्यतोभ्यः॥ सर्वेषां वागीश्वराणां ब्रह्मादीनामपीश्वरः सर्ववागीश्वरेश्वरः॥ अवगाह्यस
दानंदं विश्रम्य सुखमासते योगिन इति महाह्रद इवेति महाह्रदः॥ गर्तवदस्य माया महती दुरत्ययेति महा
ह्रदः॥ गर्तवदस्य माया महागर्तः॥ मम माया दुरत्ययेति भगवद्वचनात्॥ महागर्तशब्दो रथपर्यायो वेतस्मै
रकः तस्मान्महारथो महागर्तः॥ महारथत्वमस्य प्रसिद्धं महाभारतादिषु कालत्रयानवच्छिन्नस्वरूपत्वा
महाभूतः॥ सर्वाणि भूतानि यस्मिन्निधीयंत इति महानिधिः॥ महांश्चासौ निधिश्चेति महानिधिः॥
१ः॥ श्लोकः कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः॥ अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥ १०१॥ टीका॥
कुं धरणीं भारावतारणं कुर्वन्मोदयतीति कुमुदः आदिवराहात्मकः॥ कुंदपुष्पतुल्यानि शुभ्राणि कल्याणा
नि फलानि तानि राति ददातीति लात्याद न इति वा रलयोरैकत्वस्य स्मरणात्कुंदरः॥ कुं धरां दारयामास हिर
ण्याक्षजिघांसया वाराहरूपमास्थायेति वा कुंदरः॥ कुंदोपमः सुंदरांगत्वात्स्वच्छः स्फटिकवन्निर्मल इति
कुंदः॥ कुं पृथ्वीं कश्यपाय ददातीति वा कुंदः॥ सर्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्॥ तस्मिन्यज्ञे महाने
दक्षिणां भृगुनंदनः मारीचाय ददौ प्रीतः कश्यपाय वसुधरामिति हरिवंशे कुं पृथिवीं द्यति खंडयतीति वा
कुंदः कुशब्देन पृथ्वी ईश्वरालक्ष्यं ते निःक्षत्रियां पश्च चकार मेदिनीमनेकशो बाहुबलेन पार्थिवान्तपः कार्त
वीर्यस्य सभार्गवोत्तमो मम मास्तु मांगल्यविवृद्धये हरिरिति वसुधर्मे॥ पर्जन्यवदाध्यात्मिकादितापत्रयं ४५

शमयति॥ सर्वान्कामानभिवर्षतीति वा पर्जन्यः॥ स्मृतिमात्रेण पुनातीति पवनः॥ इलति प्रेरणं करोतीति इलः नह ९३
कितत्वादनिलः॥ इलति स्वपितीत्यनइलः॥ १॥ तद्विपरीतत्वान्नित्यप्रबुद्धस्वरूपत्वादनिलो वा॥ अप्राणवानिले गी
हनार्यत्वात्कप्रत्ययांतादूपमग्रहणो निलो वा॥ स्वात्मा स्वरूपानंदामृतरसमश्नातीत्यमृताशः॥ मथितम
मृतममरादीन्पाययित्वा स्वयमप्यपिबदिति वामृताशः॥ अमृतमनश्वरफलत्वादाशा वा यस्येति
वामृताशः॥ मृतं मरणं तद्वर्जितं वपुरस्येत्यमृतवपुः॥ सर्वं जानातीति सर्वज्ञः॥ यः सर्वज्ञः सर्वविदिति श्रुतेः॥
सर्वतोऽक्षिशिरोमुखमिति भगवद्वचनात्सर्वतोमुखः॥ १०१॥ श्लोकः सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः॥
न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरांध्रनिषूदनः॥ १०२॥ टीका॥ पत्रपुष्पफलादिभिर्भक्तिभावमात्रसमर्पितैः सुखे
न लभ्यत इति सुलभः॥ पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु॥ भक्त्यैकलभ्ये पुरुषे पुराणे मुक्त्यै कथं न
क्रियते प्रयत्नः इति महाभारते॥ शोभनं व्रतं यतिर्भुंक्ते भोजनानि निवर्तत इति वा सुव्रतः॥ अनन्याधीनसिद्धत्वात्सिद्धः॥
सुरशत्रव एवास्य शत्रवः तान् जयतीति शत्रुजित्॥ तापनात्सुरशत्रूणां शत्रुतापनः॥ न्यग्भूतानि सर्वेषा
मुपरि वर्तमान इति न्यग्रोधः पृषोदरादित्वाद्धकारस्य धकारादेशः सर्वाणि भूतानि न्यक्कृत्य निजमायया कारण
द्रिवृणोतीति वा न्यग्रोधः॥ अंबरादुद्गतः कारणत्वेनेत्युदुंबरः॥ पृषोदरादित्वाद्वकारस्याकारादेशः यद्वादुं
बरमन्नादं तेन तदात्मना विश्वं पोषयन्नुदुंबरः॥ उग्रान्नादमुदुंबरमिति श्रुतेः॥ न्यग्रोधोदुंबर इति विसर्गलोपे
संधिरार्षः॥ श्वोऽपि न स्थास्यतीत्यश्वत्थः पृषोदरादित्वादेव सकारस्य तकारादेशः॥ ऊर्ध्वमूलमधःशाखा

एषोऽश्वत्थः सनातन इति श्रुतेः ॥ ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं ॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेद
वित् इति स्मृतेश्च ॥ चाणूरनामानं मल्लं निषूदितवानिति चाणूरान्ध्रनिषूदनः ॥ १०१ ॥ श्लोकः ॥ सहस्रा
र्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥ अमूर्तिरनघोऽचिंत्यो भयकृद्भयनाशनः ॥ १०२ ॥ टीका ॥ सहस्राण्यनंता
न्यर्चींषि यस्य स सहस्रार्चिः ॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भास
स्तस्य महात्मन इति गीतासु संजयोक्तेः ॥ २६ ॥ सप्त जिह्वा अस्य संतीति सप्तजिह्वः अग्निरूपी ॥ काली क
राली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा स्फुलिंगिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वा
इति श्रुतेः २७ ॥ सप्तैधांसि दीप्तयोऽस्येति सप्तैधाः अग्निः सप्त ते समिधः सप्त जिह्वाः सप्त धामानीति मंत्र
वर्णात् ॥ २८ ॥ सप्त अश्वा वाहनान्यस्येति सप्तवाहनः ॥ सप्त नामैकोऽश्वो वाहनमस्येति वा सप्तवाहन आदि
त्यः ॥ एको अश्वो वहति सप्तनामेति श्रुतेः ॥ २९ ॥ मूर्तिर्वल्लरूपं धारणसामर्थ्यं चराचरलक्षणं ॥ ताभ्योऽभि
तप्ताभ्यो मूर्तिरजायतेति श्रुतेः ॥ तद्रहित इति अमूर्तिः अथवा देहसंस्थानलक्षणा मूर्तिर्नास्ति गावयवा
मूर्तिस्तद्रहितो वा अमूर्तिः ॥ ३० ॥ अघं दुःखं पापं च तद्द्वयं यस्य न विद्यत इति अनघः ॥ ३१ ॥ प्रमाणादि साक्षि
त्वेन सर्वप्रमाणागोचरत्वादचिंत्यः ॥ अयमीदृश इति विश्वप्रपंचविलक्षणत्वेन चिंतयितुमशक्यत्वा
दचिंत्यः ॥ ३२ ॥ असन्मार्गवर्तिनां भयं करोतीति भयकृत् ॥ भक्तानां भयं कृंतति कृणोतीति वा भय
कृत् ॥ ३३ ॥ वर्णाश्रमाचारवतां भयानि नाशयतीति भयनाशनः ॥ वर्णाश्रमाचारवता पुरु... षेण

परः पुमान् विष्णुराराध्यते पंथा नान्यस्तत्तोषकारक इति पराशरवचनात् ॥ अथवा तैराराधितस्तद्भयं नाशयती
ति भयनाशनः ॥ ३४ ॥ श्लोकः ॥ अणुः ३५ ॥ बृहत् ॥ ३६ ॥ कृशः ॥ स्थूलो ॥ ३७ ॥ गुणभृत् ३८ ॥ निर्गुणो ॥ ३९ ॥ महान् ॥ ४० ॥ अ
धृतः ४१ ॥ स्वधृतः ॥ ४२ ॥ स्वास्यः ॥ ४३ ॥ प्राग्वंशो ॥ ४४ ॥ वंशवर्द्धनः ॥ ४५ ॥ १०४ ॥ टीका ॥ सौक्ष्म्यातिशयशालि
त्वादणुः ॥ एषोऽणुरात्मा मनसा वेदितव्य इति श्रुतेः ॥ ३५ ॥ बृहत्त्वाद्बृंहणत्वाच्च ब्रह्म बृहत् ॥ महतो महीयानिति
श्रुतेः ॥ ३६ ॥ अस्थूलमिति विधत्मारमत ॥ ३७ ॥ वेदादिभिरयमेवैकः परमेश्वरत्वेन कल्पितः ॥ सर्वैर्वेदैः कल्पि
त इति वा कल्पितः ॥ सर्वे वेदा यत्पदमामनंति इति श्रुतेः ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहमि
ति भगवद्वचनात् ॥ वेदे रामायणे चैव पुराणे भारते तथा ॥ आदौ मध्ये तथा चांते विष्णुः सर्वत्र गीयते इति वच
नेभ्यः ॥ सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्युक्तेः ॥ किं हि तदध्वनो विष्णोर्व्यापनशीलस्य पारं परमं
पदं विष्णुसतत्वमित्याकांक्षायामिंद्रियादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते इंद्रियेभ्यः पराह्यर्था इत्यारभ्य पुरु
षान्न परं किंचित्सा काष्ठा सा परा गतिरित्यंतेन वः सकल्पितः ॥ ४६ ॥ योगो ज्ञानं तेनैव गम्यत्वाद्योगी योगः
समाधिः स हि स्वात्मनि सर्वदा समाधत्ते स्वात्मानं तेन वा योगी ॥ ४७ ॥ अन्ये तु योगिनो योगांतरायैर्विहन्यंते
स्वरूपात्प्रमाद्यंति अयं तु तद्रहितत्वात्तेषामीश इति योगीशः ॥ ४८ ॥ सर्वान्कामान्ददातीति सर्वकामदः ॥
फलमत उपपत्तेरिति भगवता वेदव्यासेनाभिहितत्वात् ॥ ५० ॥ आश्रमवत्संसारे भ्रमतां सर्वेषां विश्राम
स्थानत्वादाश्रमः ॥ ५१ ॥ अविवेकिनः सर्वान् संतापयतीति श्रमणः । श्रमु तपसि खेदे ॥ ५२ ॥ आसा

नार

तामातीणः प्रजाः सर्वाः करोतीतिन्नामः ।। तत्करोति तदाचष्ट इति णिचि पचाद्यचि कृते संपन्नः ग्राम इति ।। ५२ ।। ग्रामनानि
त्यादिनाऽव्यक्तप्रतिषेधात्कृशः ।। स्थूलरत्वंतु प्रपञ्च्यते सर्वात्मत्वात् ।। ३७ ।। सत्वरजस्तमसां सृष्टिस्थितिलयकर्मस्वधिष्ठातृ
त्वाद्गुणभृत् ।। ३८ ।। परमार्थतो गुणाभावान्निर्गुणः ।। साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः ।। ३९ ।। शब्दादिगुणरहितत्वान्नि
रतिशयसूक्ष्मत्वान्नित्यशुद्धसर्वगतत्वादिति सत्य श्रुति वंधकं कर्मजातं न तर्कतोपि न शक्यं वक्तुं अतएव महान् ।। अशब्दोऽस्पर्शी
श्च महान् शुचिरित्यापस्तंवः ।। ४० ।। पृथिव्यादीनां धारकाणामपि धारकत्वान्न केनापि ध्रियत इत्यधृतः ।। ४१ ।। यद्येवम
यं केन धार्यत इत्याशंका ।। स्वेनात्मनैव धार्यत इति स्वधृतः ।। स भगवान्कस्मिन्प्रतिष्ठित इति ।। स्वे महिम्नीति श्रुतेः ।। ४२ ।।
सुष्ठु शोभनं पद्मोदरदलताम्रमतिरूपतमम् आस्यमस्येति स्वास्यः ।। वेदात्मको महापुरुषराशिस्तस्य मुखं वा निर्ग
तः पुत्रपौत्रोपदेशार्थमिति वा स्वास्यः ।। अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिर
स इति श्रुतेः ।। ४३ ।। अन्यस्य वंशिनो वंशः मूलपुरुषादर्वागिति पश्चात्तः अस्य वंशः प्रपंचः प्रागेव न पश्चादिति प्रा
ग्वंशः ।। ४४ ।। वंशं प्रपंचं वर्द्धयन् छेदयन्वा वंशवर्द्धनः वृधु छेदनपूरणयोः ।। ४५ ।। ११४ ।। श्लोकः भारभृत्कथितो
४७ ।। योगी ।। ४८ ।। योगीशः ।। ४९ ।। सर्वकामदः ।। ५० ।। आश्रमः ।। ५१ ।। श्रमणः ।। ५२ ।। क्षामः ।। ५३ ।। सुपर्णः ।। ५४ ।। वायु
वाहनः ।। ५५ ।। ११५ ।। टीका ।। अनंतादिरूपेण भुवो भारं पर्णानि छंदांसि संसारतरुरूपिणोऽस्येति सुपर्णः ।। छंदां
सि यस्य पर्णानि यस्तं वेद स वेदविदिति भगवद्वचनात् ।। ५४ ।। वायुर्वहति यद्भीता स वायुवाहनः ।। भीषास्माद्वा
तः पवत इति श्रुतेः ।। ५५ ।। ११५ ।। श्लोकः धनुर्द्धरो ।। ५६ ।। धनुर्वेदो ।। ५७ ।। दंडो ।। ५८ ।। दमयिता ।। ५९ ।। दमः ।। ६० ।। अपराजि
तः ।। ६१ ।। सर्वसहो ।। ६२ ।। नियंता ।। ६३ ।। नियमो ।। ६४ ।। यमः ।। ६५ ।। ११६ ।। टीका ।। रामो धनुः श्रीमान् धारयामासे

ति धनुर्द्धरः ।। ५६ ।। स एव दाशरथिर्धनुर्वेदं वेत्तीति धनुर्वेदः ।। ५७ ।। दमयतां दमनाद्दंडः ।। दंडो दमयतामस्मीति भग
वद्वचनात् ।। ५८ ।। वैवस्वतनरेन्द्रादिरूपेण प्रजा दमयतीति दमयिता ।। ५९ ।। दमो दंडकार्यं फलं तच्च स एवेति दमः ।।
६० ।। शत्रुभिर्न पराजित इत्यपराजितः ।। ६१ ।। सर्वकर्मसु समर्थ इति सर्वसहः ।। नियतिवशादपराधिनो रावणादीन्
सहते पृथिव्यादिरूपेण वा सर्वं सहत इति सर्वसहः ।। ६२ ।। नियमो नियतिस्तस्य न विद्यत इत्यनियमः ।। ६४ ।।
सर्वनियंतुर्नियंत्रंतराभावान्नास्य विद्यते यमो मृत्युरित्ययमः ।। अथवा यमनियमौ स्वरूपं योगांगयोगोत
ज्ञम्यत्वात्स एव नियमो यमश्च ।। ६५ ।। ११६ ।। श्लोकः सत्ववान् ।। ६६ ।। सात्विकः ।। ६७ ।। सत्यः ।। ६८ ।। सत्यधर्मपरायणः ।।
६९ ।। अभिप्रायः ।। ७० ।। प्रियार्होऽर्हः ।। ७१ ।। प्रियकृत्प्रीतिवर्द्धनः ।। ७२ ।। ११७ ।। टीका ।। शौर्यवीर्यादिकं सत्वमस्येति
सत्ववान् ।। ६६ ।। सत्वे गुणे प्राधान्येन स्थित इति सात्विकः ।। ६७ ।। सत्सु साधुत्वात्सत्यः ।। ६८ ।। सत्ये यथाभूतार्थकथ
ने धर्मे च चोदनालक्षणे प्रकर्षेण नियत इति सत्यधर्मपरायणः ।। ६९ ।। अभिप्रीयते पुरुषार्थकांक्षिभिरिति अभि
मुखत्वेन ।। प्रलयेऽस्मिन्नेतीति जगदिति वा अभिप्रायः ।। ७० ।। प्रियाणीष्टान्यर्हतीति प्रियार्हः ।। यद्यदिष्टतमं लो
के यच्चास्य दयितं गृहे ।। तत्तद्गुणवते देयं तदेवाक्षयमिच्छतेति स्मरणात् ।। ७२ ।। स्वागतासनप्रशंसार्घ्यपूजास्तु
ति नमस्कारसाधनादिभिः पूजनीय इत्यर्हः ।। ७३ ।। न केवलं प्रियार्ह एव अपितु स्तुत्यादिभिर्भजतां प्रियं क
रोतीति प्रियकृत् ।। ७४ ।। तेषामेव प्रीतिं वर्द्धयतीति प्रीतिवर्द्धनः ।। ७५ ।। ११७ ।। श्लोकः विहायसगति ।। ७६ ।।
ज्योतिः ।। ७७ ।। सुरुचिः ।। ७८ ।। हुतभुक् ।। ७९ ।। विभुः ।। ८० ।। रवि ।। ८१ ।। विरोचनः ।। ८२ ।। सूर्यः ।। ८३ ।। सविता ।। ८४ ।। रवि
लोचनः ।। ८५ ।। ११८ ।। टीका ।। विहायसं विहायः गतिराश्रयोऽस्येति विहायसगतिः ।। विष्णुपदमादित्यो वा

रूपस्त्वेवेति ॥ नारायणः परं ज्योतिरिति मंत्रवर्णात् ॥ शोभनारुचिर्दीप्तिर्विशेषोवास्येति
७६॥स्वयमेव द्योततइति ज्योतिः ॥ नारायणः परं ज्योतिरिति मंत्रवर्णात् ॥ शोभनारुचिर्दीप्तिर्विशेषोवास्येति हुतभुक् ॥७५॥ सर्वत्रैव वर्त्त
सुरुचिः ॥७७॥ समस्तदेवतोद्देशानुप्रवृत्ते यज्ञादिकर्मसु हुतं भुंक्ते भुनक्तीति हुतभुक् ॥ विविधं रोचतइति विरो
मानत्वात्रयाणां लोकानां प्रभुत्वाद्विभुः ॥८०॥ रसमादत्तइति रविरादित्यात्मा ॥८१॥ विविधं रोचतइति विरो
चनोऽग्निसूर्योर्वा ॥८२॥ सूयते सर्वमिति सूर्यः ॥ सूयते सूर्यशब्दो निपात्यते ॥ राजसूयसूर्य इति पाणिनीयवचनात्सूर्यः ॥८३॥ सर्वस्य जगतः प्रसवितृत्वात्सविता ॥ रसानां च तत्पादानाद्रविरिति निधी
रूपस्यैत्वादि पाणिनीयवचनात्सूर्यः ॥८३॥ सर्वस्य जगतः प्रसवितृत्वात्सविता रसानां चतत्पादानाद्रविरिति रविलोचनः ॥
यते ॥ रश्मीनां च प्रसवनात्सवितेति निगद्यतइति विष्णुधर्मोत्तरे ॥८४॥ रविर्लोचनं चक्षुरस्येति रविलोचनः ॥८५॥ अनंतो ॥८६॥ हुतभुक् ॥८७॥ भोक्ता ॥८८॥ सुखदो
अग्निर्मूर्द्धा चक्षुषी चंद्रसूर्याविति मंत्रवर्णात् ॥८५॥ १०८ श्लोकः ॥ अनंतो ॥८६॥ हुतभुक् ॥८७॥ भोक्ता ॥८८॥ सुखदो ॥८९॥ टीका ॥
॥ नैकजो ॥९०॥ अग्रजः ॥९१॥ अनिर्विण्णः ॥९२॥ सदामर्षी ॥९३॥ लोकाधिष्ठानं ॥९४॥ अद्भुतः ॥९५॥ १०९ ॥ प्रकृतिभो
८५॥ नैकजो ॥९०॥ अग्रजः ॥९१॥ अनिर्विण्णः ॥९२॥ सदामर्षी ॥९३॥ हुतं भुनक्तीति हुतभुक् ॥८६॥ हुतं भुनक्तीति हुतभुक् ॥८७॥ प्रकृतिमो
नित्यः सर्वगतत्वाद्देशकालवस्तुपरिच्छेदाभावादनंतः शेषरूपो वा ॥८६॥ हुतं भुनक्तीति हुतभुक् ॥ असुरवं खंडयतीति वा
गयां अचेतनां भुक्ताजगत्पालकोवा भोक्ता ॥८८॥ भक्तानां सुखं मोक्षलक्षणं ददाति ॥ असुराणां सुखं खंडयतीति वा
गयां अचेतनांभुक्ताजगत्पालकोवाभोक्ता ॥८८॥ भक्तानां सुखं मोक्षलक्षणं ददाति ॥ ॥ हिरण्यग
सुखदः ॥८९॥ धर्मगुप्तये असकृज्जायमानत्वान्नैकजः ॥९०॥ अग्रे जायतइत्यग्रजो हिरण्यगर्भः ॥ हिरण्यग
सुखदः ॥८९॥ धर्मगुप्तये असकृज्जायमानत्वान्नैकजः ॥९०॥ अग्रे जायतइत्यग्रजो हिरण्यगर्भः ॥९१॥ हिरण्यग
र्भः समवर्त्तताग्रे इति श्रुतेः ॥९१॥ अवाप्तसर्वकामत्वाद प्राप्तिहेत्वभावान्निर्वेदोऽस्य नास्तीत्यनिर्विण्णः ॥
९२॥ सतः साधून्नामिमुख्येन मृष्यतिक्षमत इति सदामर्षी ॥९३॥ तमनाधारमाधारमधिष्ठाय त्रयो लोका
स्तिष्ठंतीति लोकाधिष्ठानं ब्रह्म ॥९४॥ अद्भुतवदद्भुतः ॥ स्ववर्णानादिवहुभिर्यैर्न लभ्यः प्राप्तं तोपि च बहु

वोयं न विद्युः ॥ आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्ट इति श्रुतेः ॥ आश्चर्यवत्पश्यति कश्चि
देनमिति भगवद्वचनात् ॥ स्वरूपशक्तिव्यापाराश्चर्यैः अद्भुतत्वाद् अद्भुतः ॥९५॥ १०९ ॥ श्लोकः ॥ सनात् ॥९६॥ सनातनतमः
॥९७॥ कपिलः ॥९८॥ कपिरव्ययः ॥९९॥ स्वस्तिदः ॥१०० स्वस्तिकृत् ॥१॥ स्वस्ति स्वस्ति भुक् ॥४॥ स्वस्तिदक्षिणः ॥५॥
११० ॥ टीका ॥ सनादिति निपातश्चिरार्थवचनः कालश्च परमस्यैव विकल्पना परस्य ब्रह्मणो रूपं पुरुषः प्रथ
मद्विजव्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरः इति विष्णुपुराणवचनात् ॥ अनादिर्यः स सनादित्युच्यते ॥
९६॥ सर्वकारणत्वाद्विरिंच्यादीनामपि सनातनानामतिशयेन सनातनत्वात्सनातनतमः ॥९७॥ वडवानल
लस्य कपिलो वर्णः इति तद्रूपी कपिलः ॥९८॥ कं जलं रश्मिभिः पिबन् कपिः सूर्यः ॥ कपिर्वराहो वा ॥ कपिर्वरा
हश्रेष्ठश्चेति वचनात् ॥९९॥ अव्यये प्रलये तस्मिन्नपि यं तिजमंतीत्यव्ययः ॥ १२ ॥ इति नाम्नां नवमं शतं ॥ वि
वृत्तं ॥१००॥ अनंतोऽथ पावनः शत्रुतापनो नवो महान् सर्वकामदः रमोऽमिप्रायोरविरग्रजः इति दशकादिना
मानि ॥१०॥ भक्तानां स्वस्ति मंगलं ददातीति स्वस्तिदः ॥१॥ तदेव स्वस्ति करोतीति स्वस्तिकृत् ॥ मंगलं स्वस्ति
परमानंदस्वरूपमात्मीयं तदेव भुंक्ते भक्तानां भुनक्तीति वा स्वस्तिभुक् ॥४॥ स्वस्तिरूपेण दक्षते वर्द्धते स्व
स्तिदातुं समर्थः इति स्वस्तिदक्षिणः ॥ अपवादक्षिणशब्दश्चाशुकारिणि वर्तते शीघ्रं स्वस्तिदातुमयमेव
समर्थः ॥ स्मरणादेव कृष्णस्य सिद्ध्यंति सर्वसिद्धयः ॥ स्मृते सकलकल्याणभाजनं यत्र जायते ॥ पुरुषं
तमजं नित्यं व्रजामि शरणं हरिं ॥ स्मरणादेव कृष्णस्य पापसंघातपंजरं ॥ शतधा भेदमायाति गिरिर्वज्रहत
तो यथा इति वचनात् ॥५॥ ११० ॥ श्लोकः ॥ अरौद्रः ॥६॥ कुंडली ॥७॥ चक्री ॥८॥ विक्रम्यूर्जितशासनः ॥१०॥ शब्दातिगः ॥

100

११॥ शब्दसहः।१२॥ शिशिरः।१३॥ शर्वरीकरः।१४॥१११॥ टीका॥ कर्मरौद्रं कामश्च रौद्रः कोपश्च रौद्रः त्रयमस्य नास्ति
अवाप्तसर्वकामत्वेन रागद्वेषादेरभावादित्यरौद्रः॥६॥ शेषरूपभाक् कुंडली॥ यद्वा सांख्ययोगात्मके कुंडले
अवाप्तसर्वकामत्वेन रागद्वेषादेरभावादित्यरौद्रः॥६॥ शेषरूपभाक् कुंडली॥ यद्वा सांख्ययोगात्मके कुंडले
मकराकारे अस्य सन्तीति कुंडली॥ सहस्रांशुमंडलोपमकुंडलधारणाद्वा कुंडली॥७॥ शेषरूपो हरिश्च क्रीति
चक्री॥ समस्तलोकरक्षार्थं मनस्तत्त्वात्मकं सुदर्शनं चक्रं धत्ते इति वा चक्री॥ चलस्वरूपमत्यंतं जवेनांत
रितानिलं॥ चक्ररूपं च मनो धत्ते विष्णुः करे स्थितमिति विष्णुपुराणे॥८॥ विक्रमः पादविक्षेपः शौर्यं वाद्व
यं चाशेषपदार्थेभ्यो विलक्षणमस्येति विक्रमी॥९॥ श्रुतिस्मृतिलक्षणमूर्जितं शासनमस्येति ऊर्जितशासनः।
श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते आज्ञाछेदी मम द्वेषी मद्भक्तोपि न वैष्णव इति भगवद्वचनात्॥१०॥ श
ब्द प्रवृत्तिहेतूनां जात्यादीनामभावाच्छब्देन वक्तुमशक्यत्वाच्छब्दातिगः॥ यतो वाचो निवर्तंते अप्राप्य म
नसा सहेत्यशब्दमस्पर्शं न शब्दगोचरं यस्य योगिध्येयं परं पदमिति श्रुतिस्मृतिभ्यश्च॥११॥ तमेव सर्वे
वेदास्तात्पर्येण वदंतीति शब्दसहः॥ सर्वे वेदा यत्पदमामनंति॥ वेदैश्च सर्वैरहमेव वेद्य इति श्रुतिस्मृ
तिभ्यां॥१२॥ तापत्रयाभितप्तानां विश्रामस्थानत्वाच्छिशिरः॥१३॥ संसारिणामात्मा सर्वरीवत् शर्वरी
ज्ञानिनां पुनः संसारः शर्वरी नामुभयेषां करोतीति शर्वरीकरः॥ या निशा सर्वभूतानां तस्यां जागर्ति संय
मी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेरिति भगवद्वचनात्॥१४॥१११॥ श्लोकः॥ अक्रूरः
१५। पेशलो॥१६। दक्षो॥१७ दक्षिणः।१८॥ क्षमिणांवरः।१९॥ विद्वत्तमो॥२०॥ वीतभयः।२१॥ पुण्यश्रवणकीर्तनः।२२॥ ४८

101

११२॥ टीका॥ क्रौर्यं नाम मनोधर्मः अंतरकोपजः संतापः साभिनिवेशः॥ अवाप्तसर्वकामत्वात्कामाभावं तस्मात्त
स्य क्रौर्यं नास्तीत्यक्रूरः॥१५॥ कर्मणा मनसा वाचा च शोभनत्वात्पेशलः॥१६॥ प्रवृद्धः शक्तः शीघ्रकारी समर्थः॥
विशेषणत्रयं चैव तत्परमेश्वरे स्मिन्नियतमिति दक्षः॥ दक्षिणः शब्दस्यापि दक्षलक्षणार्थः॥ पुनरुक्तिदोषो नास्ति
शब्दभेदात् अथवा दक्षते गच्छतीति हिनस्तीति वा दक्षिणः दक्ष गतिहिंसनयोरिति धातुपाठात्॥१८॥ क्षमावतां
योगिनां पृथिव्यादीनां भारधारिणां वरः॥ क्षमया पृथिवीसम इति वाल्मीकिवचनात्॥ ब्रह्मांडमखिलं वहन्
पृथिवीभारेणानार्दित इति पृथिव्या अपि वरः क्षमिणांवरः॥ क्षमिणः शक्ताः अयं तु सर्वशक्तिमत्त्वात्सकलाः
क्रियाः कर्तुं क्षम इति वा क्षमिणांवरः॥१९॥ निरस्तातिशयं ज्ञानं सर्वदा सर्वगोचरं॥ अस्यास्तीत्येवेतरथा
मिति विदित्त मोहरिः॥२०॥ वीतं विगतं भयं सांसारिकं संसारलक्षणं वास्येति वीतभयः॥२१॥ सर्वमस्वत्वान्नित्यमु
क्तत्वाच्च पुण्यं पुण्यकरं श्रवणं कीर्तनमस्येति पुण्यश्रवणकीर्तनः॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेदि
ति श्रवणादिफलवचनात्॥२२॥ श्लोकः॥ उत्तारणो॥२३॥ दुष्कृतिहा॥२४॥ पुण्यो॥२५॥ दुःस्वप्ननाशनः॥२६॥ वीरहा॥
२७॥ रक्षणः॥२८॥ संतो॥२९॥ जीवनः॥३०॥ पर्यवस्थितः॥३१॥११२॥ टीका॥ संसारसागरादुत्तारयतीति उत्तारणः॥२३॥
दुष्कृतिनः पापसंज्ञिकाः हंतीति दुष्कृतिहा॥२४॥ स्मरणादि कुर्वतां पुण्यं करोतीति पुण्यः॥ स्वयं सर्वेषां श्रुतिस्मृतिल
क्षणया वाचा पुण्यमाचष्ट इति वा पुण्यः॥२५॥ भाविनोऽर्थस्य सूचकान् दुःस्वप्नान्नाशयतीति ध्यातः स्तुतः पूजितश्च
ति दुःस्वप्ननाशनः॥२६॥ विविधाः संसारिणां वीरा गतीर्मुक्तिप्रदानेन हंतीति वीरहा॥२७॥ सत्त्वगुणमधिष्ठाय जग
त्त्रयं रक्षन् रक्षणः॥ नेत्राद्विवाल्कुटकर्त्रेरिति॥२८॥ सन्मार्गवर्तिनः संतः तद्रूपेण विद्याविनयवृद्धये सत्त्वं वर्ततेऽत

तिसंततः॥२९॥ सर्वाः प्रजाः जीवरूपेण जीवयन्जीवनः॥३०॥ परितः सर्वतो विश्वं व्याप्यावस्थित इति पर्यवस्थितः॥३१॥
११४॥ श्लोकः॥ अनंतरूपो॥३२॥ नंतश्री॥३३॥ जितमन्यु॥३४॥ भयापहः॥३५॥ चतुरस्रो॥३६॥ गंभीरात्मा॥३७॥ वि
दिशो॥३८॥ व्यादिशो॥३९॥ दिशः॥४०॥११४॥ टीका॥ अनंतादिरूपेण वा विश्वप्रपंचरूपेणावस्थित इत्यनंतरूपः॥
३२॥ अनंता परिमिता शक्तिः श्रीः परा शक्तिरस्येत्यनंतश्रीः॥ परास्य शक्तिर्विविधैव श्रूयते इति श्रुतेः॥३३॥ मन्युः
क्रोधो जितो येन स जितमन्युः॥३४॥ भयं संसारजं दुःखं पुंसामपहरन् भयापहः॥३५॥ न्यायसमं वेदैश्चतुरस्रः
पुंसां कर्मानुरूपं फलं प्रयच्छतीति॥३६॥ आत्मरूपं चित्तं शरीरं वा गंभीरं परिच्छेत्तुमशक्यमस्येति गंभीरात्मा॥
३७॥ विविधानि फलानि अधिकारिभ्यो विशेषेण दिशन् विदिशः॥३८॥ विविधामाज्ञां शक्रादीनां कुर्वन् व्यादि
शः॥३९॥ समस्तानां कर्मिणां कर्मफलानि दिशन् वेदात्मनेति दिशः॥४०॥ ११५॥ श्लोकः॥ अनादि॥४१॥ भू
र्भुवो लक्ष्मीः॥४२॥ सुवीरो॥४३॥ रुचिरांगदः॥४४॥ जननो जनजन्मादिः॥४५॥ भीमो॥४६॥ भीमपराक्रमः॥४७॥
११५॥ टीका॥ आदिकारणमस्य न विद्यत इत्यनादिः॥४१॥ सर्वकारणत्वात् भूराधारभुवः सर्वभूतानामयत्नेन प्रसि
द्धायाश्च तस्या भुवोपि भूरिति भूर्भुवः॥ अप्रवान केवलमसौ भूर्भुवोपि लक्ष्मीः शोभावेति भूर्भुवो लक्ष्मीः॥
अप्रवान्भूर्भूर्लोकः भुवो भुवर्लोकः लक्ष्मीरात्मा वेद्या॥ आत्मा विद्या च देवित्वमिति श्रीस्तुतो भूम्यंतरितयोः
शोभेति भूर्भुवो लक्ष्मीः॥४२॥ शोभना विविधाः रागतयोस्येति सुवीरः॥ शोभनं विविधमीरणमस्येति वा
सुवीरः॥४३॥ रुचिरे कल्याणे अंगदे अस्यास्तीति रुचिरांगदः॥४४॥ जंतून् जनयन् जननः॥ त्वुद्धिधो बहु

लगहणात्क्रोतीरिल्युरुश्वसयः प्रयोगवचनादिवत्॥ जनस्य जनिमतो जन्म उद्भवस्तस्यादिर्मूलं कारणमिति जनजन्मा
दिः॥ मूलकारणमिति मंत्रवर्णात्॥४५॥ भयहेतुत्वाद्भीमः॥ भीमादयोपादाने निपातनादिति पाणिनिवच
नात्॥ महद्भयं वज्रमुद्यतमिति मंत्रवर्णात्॥४६॥ असुरादीनां भयहेतुः पराक्रमो यस्यावतारेष्विति सभीम
पराक्रमः॥४७॥११६॥ श्लोकः॥ आधारनिलयो॥४८॥ धाता॥४९॥ पुष्पहासः॥५०॥ प्रजागरः॥५१॥ ऊर्ध्वगः॥५२॥
सत्पथाचारः॥५३॥ प्राणदः॥५४॥ प्रणवः॥५५॥ पणः॥५६॥११६॥ टीका॥ पृथिव्यादीनां पंचभूतानामाद्याधारणा
मप्याधारत्वादाधारनिलयः॥४८॥ स्वात्मानाधत्तस्यास्यान्यो धाता नास्तीत्यधाता॥ नयतश्चेति समासांतवि
धेरनित्यत्वादिति कप्रत्ययाभावः॥ संहारसमये सकलाः प्रजाः धयति पिबतीति वा धाता धेट पाने इति
धातुः॥४९॥ मुकुलितानां पुष्पाणां हासवत् पंचरूपेण विकाशोस्येति पुष्पहासः॥५०॥ नित्यप्रबुद्धरूप
त्वात्प्रजागरः प्रकर्षरूपेण जागर्तीति वा प्रजागरः॥५१॥ सर्वेषामुपरिस्थितत्वादूर्ध्वगः॥ सतां कर्माणि
सत्पथास्तानाचरत्येवमिति सत्पथाचारः॥५३॥ मृतान्जीवयन्परीक्षित्प्रभृतीनिति प्राणदः॥५४॥ प्रणवो नाम
परमात्मवाचकः ओंकारस्तत्राभेदोपचारेणायं प्रणवः॥५५॥ पणतिर्व्यवहारार्थं स्तुतिं कुर्वन्नपणः॥ सर्वा
णि रूपाणि विचिंत्य धीरो नामानि कृत्वाभिवदन्यदास्ते इति श्रुतेः॥ पुण्यानि सर्वाणि कर्माणि पणः॥
५६॥११६॥ श्लोकः॥ प्रमाणं॥५७॥ प्राणनिलयः॥५८॥ प्राणभृत्॥५९॥ प्राणजीवनः॥६०॥ तत्त्वं॥६१॥ तत्त्वविदेकात्मा॥६२॥ जन्ममृत्युजरातिगः॥६६
समष्ट्यासंगृह्यत्याधिकारिभ्यः तत्फलं प्रयच्छ्रल्लक्षणया वा पाणः

102

104

११७। टीका। प्रमितिः संवित्स्वयं प्रभावः प्रमाणं।। प्रज्ञानं ब्रह्मेति श्रुतेः।। ज्ञानस्वरूपमत्यंतनिर्मलं परमार्थतः।। तदेवा
र्थस्वरूपेण भ्रांतिदर्शनतः स्थितमिति विष्णुपुराणे।।५७।। प्राणा इंद्रियाणि यत्र जीवे निलीयंते तत्परतंत्रत्वाद्देह
स्य धारकाः प्राणापानादयो वाता तस्मिन्निलीयंते।। प्राणं नीतिति प्राणो जीवः परे पुंसि निलीयतेऽइति वा।।
प्राणाञ्जीवान् तत्वात्मनि संहारं सोयामास्य मऽइति वा प्राणनिलयः।।५८।। पोषयन्नरूपेण प्राणानऽइति प्रा
णभृत्।।५९।। प्राणितो जीवयन्प्राणरूपैः पवनैः प्राणजीवनः।। न प्राणेन नापानेन मर्त्यो जीवति कश्चन।।
इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति मंत्रवर्णात्।।६०।। तत्त्वममृतं सत्यं परमार्थः सतत्त्वमित्येते एका
र्थवाचिनः।।६१।। परमार्थसतो ब्रह्मणो वाचकाः शब्दाः इति तत्त्वं तत्स्वरूपं यथावद्वेत्तीति तत्त्ववित्।।६२।।
एकश्चासावात्मा चेत्येकात्मा आत्मा वा इदमेक एवाग्र आसीदिति श्रुतेः यच्चाप्नोति यदादत्ते यच्चात्ति वि
षयानिह।। यच्चास्य संततो भावस्तस्मादात्मेति कीर्तितऽइति स्मृतेश्च।।६३।। जायतेऽस्ति वर्द्धते विपरिणमतेऽप
क्षीयते विनश्यतीति षड्भावविकारास्तानतीत्य गच्छतीति जन्ममृत्युजरातिगः।। न जायते म्रियते वा कदाचिदि
त्यादि मंत्रवर्णात्।।६४।।११७।। श्लोकः।। भूर्भुवः ६५। स्वस्तरु ६६। स्तारः ६७। सविता प्रपितामहः ६९। यज्ञो ७०। यज्ञ
पतिः ७१ यज्वा। ७२। यज्ञांगो ७३। यज्ञवाहनः।।७४।।११८।। टीका।। भूर्भुवः स्वः समाख्यानि त्रीणि व्याहृतिरूपा
णि अस्य त्रयीसाराणि वदंत्याहुः।। तैर्होमादिना जगत्तरति भवतेऽइति भूर्भुवः स्वस्तरुः।। अग्नौ
प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाःइति मनुवचनात्।।
अथवा भूर्भुवः स्वास्तत्र संसारवृक्षोत्रयः संसारवृक्षो भूर्भुवः स्वस्तरुः।। अथवा भूर्भुवः स्वः समाख्यं

५१ ५२

105

लोकत्रयं वृक्षवद्व्याप्य तिष्ठतीति वा भूर्भुवः स्वस्तरुः ६६।। संसारसागरात्तारयन्तारः।। प्रणवो वा ६७।। सर्वस्य
लोकस्य जनक इति सविता।।६८।। पितामहस्य ब्रह्मणोऽपि पितेति प्रपितामहः।।६९।। संगता यज्ञैः।। यज्ञात्मना
वा यज्ञः।।७०।। यज्ञानां पाता रक्षकः स्वामी वा यज्ञपतिः।। अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद
वचनात्।।७१।। यजमानात्मना तिष्ठतीति यज्वा।।७२।। यज्ञांगान्यस्येति यज्ञांगो वराहमूर्तिः।। वेदपादो यूप
दंष्ट्रः क्रतुहस्तश्चितीमुखः।। अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः।। अहोरात्रेक्षणो दिव्यो वेदांग
श्रुतिभूषणः।। आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान्।। धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्
क्रियः प्रायश्चित्तनखो घोरः पशुजानुर्महाहनुः उद्गात्रहोत्रो मंत्रलिंगः फलबीजमहौषधीः वाय्वंतरा
त्मा मंत्रस्फिग्विकृतः सोमशोणितः वेदिस्कंधो हविर्गंधो हव्यकव्यातिवेगवान् प्राग्वंशकायो द्युति
मान्नानादीक्षाभिरन्वितः।। दक्षिणाहृदयो योगी महासत्रमयो महान्।। उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्त्त
भूषणः।। नानाछंदोगतिपथो गुह्योपनिषदासनः।। छायापत्नीसहायो वै मेरुशृंग इवोच्छ्रितः इति ह
रिवंशे।।७३।। कालहेतून् क्रतून् यज्ञान्वाहयतीति यज्ञवाहनः।।७४।।११८।। श्लोकः यज्ञभृत् ७५ यज्ञकृत् ७६ यज्ञी ७७
यज्ञभुक् ७८ यज्ञसाधनः ७९ यज्ञांतकृत् ८० यज्ञगुह्यं ८१ अन्नं ८२ अन्नाद एव च।।८३।।११९ टीका।। यज्ञान्वि
भर्त्ति पालयतीति वा यज्ञभृत्।।७५।। जगदादौ तदंते च यज्ञं करोतीति यज्ञकृत् कृंततीति वा।।७६।। यज्ञानां
तत्समाराधनात्मना प्रधानं तत्समवायाद्यज्ञांशेषीति यज्ञी।।७७।। यज्ञं भुंक्ते भुनक्तीति वा यज्ञभुक्।।७८।।
यज्ञसाधनं तत्प्राप्त्युपायोऽइति यज्ञसाधनः।।७९।। यज्ञस्यांतं फलप्राप्तिं कुर्वन्यज्ञांतकृत्।। वैष्णवेंशसनेन पूर्णा

106

हुत्वा पूर्णिकत्वा वा यज्ञसमाप्तिं करोति यज्ञांतकृत॥ ९०॥ यज्ञानां गुह्यं ज्ञानयज्ञः॥ फलाभिसंधरहितो वा
यज्ञस्तदभेदोपचाराद्गुह्यं यज्ञगुह्यं॥ ९१॥ अद्यते त्ति भूतानीति वान्नं॥ अद्यते त्ति च भूतानि तस्मादन्नं तदुच्यत
इति श्रुतेः॥ ९२॥ अन्नमत्तीत्यन्नादः ९३॥ सर्वं जगदन्नान्नादरूपेणाग्नीषोमात्मकमेवेति दर्शयितुमेवका
रः॥ चशब्दः सर्वनाम्नामेकस्मिन्नपुंसि समुच्चित्य वृत्तिं दर्शयितुं॥ ११५॥ श्लोकः आत्मयोनिः ९४ स्वयंजा
तो ९५ वैखानः ९६ सामगायनः ९७ देवकीनंदनः स्रष्टा ९९ क्षितीशः ९० पापनाशनः ९१। १२०॥
टीका॥ आत्मैव योनिरुपादानकारणं नान्यदित्यात्मयोनिः॥ ९४॥ निमित्तकारणं स एवेति दर्शयितुं स्वयं
जात इति॥ ९५॥ प्रकृतिश्च प्रतिज्ञादृष्टांतानुरोधादित्यत्र स्थापितमुभयकारणत्वं हरेः॥ विशेषे
ण खननाद्वैखानः॥ धरणीं विशेषेण खनित्वा पातालवासिनं हिरण्याक्षं वाराहरूपमास्थाय जघा
नेति पुराणे प्रसिद्धं॥ ९६॥ सामानि गायतीति सामगायनः॥ ९७॥ देवक्याः सुतो देवकीनंदनः॥ ज्योतींषि
शुक्लानि च तानि लोके त्रयो लोका लोकपालास्त्रयी च॥ त्रयोऽग्नयश्चाहुतयश्च पंच सर्वे देवा देवकीपुत्र एवेति
महाभारते॥ ९८॥ अतः स्रष्टा सर्वस्य लोकस्य॥ ९९॥ क्षितेर्भूमेरीशः क्षितीशो दशरथात्मजो रामः॥ ९०॥
कीर्तितः पूजितो ध्यातः स्मृतः पापराशिं नाशयन् पापनाशनः॥ नमामि नारायणपादपंकजं स्मरामि ना
रायणतत्त्वमव्ययं॥ वदामि नारायणनाम निर्मलं करोमि नारायणपूजनं सदा॥ इति वचनात्॥ यतोप
वासयत्यापं पुरुषस्य पुनः क्षपयति प्राणायामशतेनैव तत्पापं नश्यते नृणां॥ प्राणायामसहस्रेण यत्वा
पं नश्यति नृणां॥ क्षणमात्रेण तत्पापं हरेर्ध्यानात्प्रणश्यति इति वृद्धशातातपवचनात्॥ ९१ १२०

५२ ५२

107

श्लोकः शंखभृन्नंदकी ९२। चक्री। ९३॥ शार्ङ्गधन्वा ९५ गदाधरः ९६ रथांगपाणिः ९७॥ अक्षोभ्यः ९८॥ सर्वप्र
हरणायुधः ९९॥ १२२॥ टीका॥ पांचजन्याख्यं भूतादिमहंकारात्मकं शंखं बिभर्तीति शंखभृत्॥ ९१॥ विद्यामयो नंद
कास्वोसिरस्येति नंदकी॥ ९२॥ मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रमस्यास्तीति चक्री संसारचक्रमस्याज्ञया परिवर्तते
इति वा चक्री॥ ९३॥ इंद्रियाद्यहंकारात्मकं शार्ङ्गं नाम धनुरस्येति शार्ङ्गधन्वा॥ धनुषश्चेत्यनङ्समासांतः प्रत्ययः॥ ९५॥
बुद्धितत्त्वात्मिका कौमोदकी गदास्य वहनाद्गदाधरः ९६॥ रथांगं चक्रं पाणौ यस्य स रथांगपाणिः ९७ अतएवाशक्यः
तोभितुमित्यक्षोभ्यः॥ ९८॥ एतावंत्यायुधान्यस्येत्येवं न नियम्यते अपि तु सर्वाण्येव प्रहरणान्यायुधान्यस्येति सर्व
प्रहरणायुधः॥ आयुधत्वेन प्रसिद्धानि अपि करजादीनि अस्यायुधानि भवंति अतः सर्वप्रहरणायुधवचनं॥ सत्यसंकल्प
त्वं सर्वेश्वरत्वं दर्शयितुं एष सर्वेश्वर इति श्रुतेः॥ द्विर्वचनं समाप्तिं द्योतयति॥ ॐकारश्च मंगलार्थः॥ ॐकारश्चाथशब्द
श्च द्वावेतौ ब्रह्मणः पुरा॥ कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभाविति वचनात्॥ अंते नमः इत्युक्त्वा परिचरणं
कृतवत्॥ तृप्यिष्णोतेन ऊ॥ विधेमेति श्रुतेः॥ धन्यं तदेव लग्नं तद्दिनं तदेव पुण्यमहः॥ करणस्य च सा पुंस्क्रिया यत्र
हरिः प्राज्ञैर्नमस्क्रियते॥ प्रागीत्युपलक्षणं॥ एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः॥ दशाश्व
मेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥ अतसीपुष्पसंकाशं पीतवाससमच्युतं॥ ये नमस्यंति गोविंदं न तेषां
विद्यते भयम्॥ लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रणम्य शिरसा प्रभविष्णुमीशम्॥ जन्मांतरप्रलय
कल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापम्॥ अंतेऽपि नमस्कारस्य शिष्टैराचरणात्॥ नमस्कार
फलं प्रागेव दर्शितम्॥ ९२॥ इति नाम्नां दशमं शतं विवृतं॥ स्वस्तिदः शब्दातिगः वीतभयः पर्यवस्यतः॥
अनादिः अधाता प्राणमब यज्ञः यज्ञांतकृत् इति नीवाः॥ १०॥ इति दशकादिनामानि॥ १०००॥ इतीदमित्येनेन

नामसहस्रमन्यूनाधिकमुक्तमिति दर्शयति॥ इतीदं कीर्तनीयस्य केशवस्य महात्मनः॥ नाम्नां सहस्रं दिव्या
नामशेषेण प्रकीर्तितम्॥१२१॥ दिव्यानाम प्राकृतानां नाम्नां सहस्रं प्रकीर्तितमिति वदता प्रकारांतरेण
विसंख्योपपत्तिर्दर्शिता॥ य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्॥ नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मा
नवः॥१२२॥ प्रक्रमे किं जपन्मुच्यते जंतुरिति जपशब्दोपादानात्कीर्तयेदित्यनेनापि त्रिविधो जपो लक्ष्य
ते॥ परलोकगतस्यापि ययातिनहुषादिवदमुप्राप्यभावं सूचयितुममुत्रेत्युक्तम्॥१२२॥ वेदांतगो
ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्॥ वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥१२३॥ वेदां
तानामुपनिषदर्थं ब्रह्म गच्छतीति वेदांतगः॥ किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनादिति वचनात्॥
जपकर्मणा साक्षान्मुक्तिशंकायां कर्मणां साक्षान्मोक्षहेतुत्वं नास्ति ज्ञानेनैव मोक्ष इति दर्शयितुं वेदांतगो
ब्राह्मणः स्यादित्युक्तं॥ कर्मणां सत्वशुद्धिद्वारा मोक्षहेतुत्वं॥ कषायपक्तिः कर्माणि ज्ञानं तु परमा ग
तिः॥ कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते॥ इति ज्ञानं समासाद्य नरो बंधात्प्रमुच्यते॥ धर्मात्सुखं
च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते॥ योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये॥ कर्मणा बध्यते जंतुर्वि
द्ययामृतमश्नुते॥ तस्मात्कर्म न कुर्वंति यतयः पारदर्शिनः॥ यथोक्तान्यपि कर्माणि परिहाय द्वि
जोत्तमः॥ आत्मज्ञाने शमे च स्याद्वेदाभ्यासेन यत्नवान् इति मानवं वचनं॥ तपसा कल्मषं हंति

विद्ययामृतमश्नुते॥ ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः॥ यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनीत्यादिस्मृ
तिभ्यश्च॥ तमेवं वेदानुवचनेन ब्राह्मणा विविदिषंति॥ यज्ञेन दानेन तपसानाशकेन॥ ब्रह्मविदाप्नोति परं॥ तरति शो
कमात्मवित्॥ ब्रह्मविद्ब्रह्मैव भवति॥ ब्रह्मैव सन् ब्रह्माप्येति॥ तमेव विदित्वातिमृत्युमेति॥ नान्यः पंथा विद्यते
ऽयनाय॥ यद्विद्वान्न बिभेति कुतश्चन॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः॥ यदा चर्मवदाका
शं वेष्टयिष्यंति मानवाः॥ तदा देवमविज्ञाय दुःखस्यांतो भविष्यति॥ न कर्मणा न प्रजया धनेन त्यागेनै
केऽमृतत्वमानशुः॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ते ब्रह्मलोके तु परांतका
ले परामृतात्परिमुच्यंति सर्वे इत्यादिश्रुतिभ्यश्च॥ शूद्रः सुखमवाप्नुयात्॥ श्रवणेनैव न तु जपयज्ञेन॥ तस्माच्छूद्रो
यज्ञेनवक्लृप्त इति श्रुतेः॥ श्रावयेच्चतुरो वर्णानिति भारतादिषु श्रवणमनुज्ञायते॥ सुगतिमिच्छुः श्रवणमप्र
दुर्योनिरिति हरिवंशे॥ यः शूद्रः शृणुयात्स सुखमवाप्नुयादिति व्यवहितेन संबंधः॥ त्रैवर्णिकानां कीर्तयेदि
त्यनेनोक्तम्॥१२४॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्॥ कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाः॥
चतुरासीनां मातमयुक्तेन मनसाधिष्ठितानां तेषु तेषु विषयेषु ज्ञानकूल्यतः प्रवृत्तिः कामः प्रजा संततिः॥ भक्तिमानः
सदोत्थाय शुचिस्तद्गतमानसः॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत्॥१२५॥ यशः प्राप्नोति विपुलं ज्ञाति
प्राधान्यमेव च॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्॥१२६॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति॥
भवत्यरोगो द्युतिमान्बलरूपसमन्वितः॥१२७॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात्॥ भयान्मुच्येत भीत

110

ह मुच्येतापन्न आपदः॥१२८॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमं। स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः॥
१२९॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः। सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥१३०॥ न वासुदेव
भक्तानामशुभं विद्यते क्वचित्॥ जन्ममृत्युजराव्याधिभयं नैवोपजायते॥१३१॥ इमं स्तवमधीयानः श्रद्धाभ
क्तिसमन्वितः॥ युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः॥१३२॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा
मतिः॥ भवंति कृतपुण्यानां पुरुषोत्तमे॥१३३॥ द्यौः सचंद्रार्कनक्षत्रेत्यादिनाऽनु तस्य वासुदेवस्य माहात्म्य
कथनेनोक्तफलप्राप्तिवचनं यथार्थकथनं नार्थवाद इति दर्शयति॥ द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः
वासुदेवस्य वीर्येण विधृतानि महात्मनः॥१३४॥ ससुरासुरगंधर्वं सयक्षोरगराक्षसं॥ जगद्वशे वर्ततेदं कृष्णस्य
सचराचरं॥१३५॥ इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥१३६॥ सर्वागमा
नामाचारः प्रथमं परिकल्पते आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः॥१३७॥ ऋषयः पितरो देवा महाभूतानि धात
वः॥ जंगमाजंगमं चेदं जगन्नारायणोद्भवम्॥१३८॥ योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च॥ वेदाः शास्त्रा
णि विज्ञानमेतत्सर्वं जनार्दनात्॥१३९॥ एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः॥ त्रीँल्लोकान्व्याप्य भूतात्मा
भुंक्ते विश्वभुगव्ययः॥१४०॥ इमं स्तवमित्यादिना सहस्राख्यातेन सर्वज्ञेन भगवता कृष्णद्वैपायनेन साक्षान्नारा
यणेन कृतमिति सर्वैः सादरं पठितव्यं सर्वफलसिद्धय इति दर्शयति॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्ति
तम्॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च॥१४१॥ विश्वे

11R